श्रीसिद्धसेनसूरिप्रणीतम्

# श्रीएकविंशतिस्थानप्रकरणम् ।

दक्षिणविहारिश्रीमद् अमरविजयजीमुनिपुङ्गवान्तिष-
च्चतुरविजयमुनिविरचितवृत्तिविभूषितम् ।



श्रीमद्देवविजयमुनिसदुपदेशेन प्रकाशयिता—
श्रेष्ठि खीमचंद फूलचंदभाई,
सीनोर.

जैनाचार्यश्रीमद्विजयानन्दसूरीश्वरचरणारविन्देभ्यो नमो नमः ।

श्रीमत्सिद्धसेनसूरिपुरन्दरविरचितम्

# श्रीएकविंशतिस्थानप्रकरणम् ।

जैनाचार्य-न्यायाम्भोनिधि-श्रीमद्विजयानन्दसूरीश्वराऽपरनाम-
श्रीमदात्मारामजीमहाराज-शिष्यवर्य्य-दक्षिणविहारिश्री-
मद् अमरविजयमुनिपुङ्गवचरणेन्दीवरमिलिन्दायमान-
चतुरविजयमुनिविरचितबोधिदीपिकानाम-
वृत्तिसमलङ्कृतम् ।

टीकाकारगुरुभ्रातृश्रीमद्देवविजयमुनिवरसदुपदेशेन सीनोरी-
वास्तव्यश्रेष्ठि श्रीखीमचन्द्र फूलचन्द्र इत्यनेन
स्वतातस्मृत्यर्थं श्रेयोऽर्थं च प्रकाशितम् ।


| | | |
|---|---|---|
| वीर सं. २४५० | प्रथमावृत्ति | आत्म सं. २९ |
| विक्रम सं. १९८० | ५०० | ईस्वी सन् १९२४ |

मूल्यं सदुपयोगः

प्रकरणमिदं साधुसाध्वीभ्यो भाण्डा-
गारेभ्यश्चोपदीकरिष्यते ।


बडोदरा—लुहाणामित्र स्टीम प्रिं. प्रेसमां अंबालाल विट्ठलभाई ठक्करे
प्रकाशक माटे छाप्युं. ता. १५-६-२४

मंगावनारे पोष्ठ खर्चनी एक आनानी टिकिट मोकलवी.

मळवानुं ठेकाणुः-
शा. खीमचंद फूलचंद.
मु. सीनोर. वाया मीयागाम—रेवाकांठा.

जैनाचार्य–न्यायांभोनिधि–श्रीमद् विजयानंदसूरीश्वरजीना लघुशिष्य–
दक्षिणविहारी–श्री **अमरविजयजी महाराज.**

जन्म संवत १९१५ ना फागुण शुदि १५



दीक्षा संवत १९३८ ना वैशाख शुदि २

શિનોરવાસી શા. ગુલાબચંદ શિવલાલભાઇએ પોતાની સ્વ.
સધર્મચારિણીના શ્રેયોર્થે તથા ગુરૂભક્તિ નિમિત્તે આ
ફોટો દાખલ કરાવ્યો છે.

दक्षिणविहारिसद्गुरुवर्य श्रीमदमरविजयमुनिपुङ्गव-

## गुणस्तुत्यष्टकम्.

"मन्दाक्रान्तावृत्तम्"

श्रेयोलक्ष्मीं विमलहृदयोऽवोढ योऽमूढलक्ष्यो
योऽगाढाऽर्हत्समयजलधिं बुद्धिनावा गभीरम् ।
यश्चाऽगूढेन्द्रियभरमरं यो व्यषोढोपसर्गान्
सोऽयं दद्यादमरविजयः सद्गुरुर्मङ्गलं नः ॥१॥

आभोद्विश्वं विमलयशसा पाथसेवाऽम्बुवाहो
योऽघर्णिष्ट प्रचुरतपसा तेजसेवोष्णरश्मिः ।
यश्चाऽचर्तीत् समयमनघं मूर्त्तिसिद्धिप्रधानं
सोऽयं देयादमरविजयः सद्गुरुः सद्गतिं नः ॥२॥

और्णावीद्योऽवगुणनिवहं शुद्धचेताः परेषां
नैषाऽक्रासीत् प्रतिदिनमरं चाऽक्रसीद्वर्चसा यः ।
धर्म्ये कार्येऽयसदमलधीरक्षुभन्नो खलोक्त्या
सोऽयं दिश्यादमरविजयः सद्गुरुः सन्मतिं नः ॥३॥

अस्कांत्सीद्यो भवजलनिधिं वाडवार्चिर्वदुग्रं
योऽगोपायीत् खनिकरमरं पापवर्त्मप्रयान्तम् ।
यश्चाऽदासीद्भविजनगणस्वान्तमंहोऽवलिप्तम्
सोऽयं छिन्द्यादमरविजयः सद्गुरुर्नोऽघजालं ॥४॥

अस्फायिष्टाऽमलगुणगणैः शीतरोचिर्वरेण्यै
योऽवर्त्तिष्टाऽऽर्हतपथि सदा मुक्तये योऽत्ररिष्ट ।
यश्चाऽभांक्षीत् स्मररिपुबलं शीलसन्नाहशाली
सोऽयं कुर्यादमरविजयः सद्गुरुर्नः सुखानि ॥५॥

अत्याक्षीद्यो गृहमघभिदे जैनदीक्षामवाक्षीद्
भक्त्याऽभाक्षीत् सुगुरुविजयानन्दसूरिक्रमाब्जम् ।
तानप्राक्षीज्जिनमतरहस्यानि गूढार्थभाञ्जि
सोऽयं तन्यादमरविजयः सद्गुरुर्नः प्रबोधम् ॥६॥

श्रामण्यं योऽदित हितमतिं योऽधित प्राणिवर्गे
यो नाऽखित्ताऽऽपदि सुखहृतोऽभित्त योऽन्तर्द्विषश्च ।
पाप्माऽहार्षीद् घनमसुमतां यो व्यहार्षीद्धरित्र्यां
सोऽयं भिन्द्यादमरविजयः सद्गुरुर्नोऽन्तरारीन् ॥७॥

विश्वं विश्वं विमलयशसा योऽस्नरिष्टाऽकरीष्टा-
ऽन्तर्द्विट्सैन्यं सुमतिमनिशं योऽवरीष्ट प्रकामम् ।
योऽद्राप्सीन्नो निजगुणगणैर्नोऽकुपत् कर्हि कस्मै
सोऽयं पुष्यादमरविजयः सद्गुरुः सम्पदं नः ॥८॥

इत्थं स्फूर्जत्सुगुरुचरणाम्भोजभृङ्गायमानो
भक्त्या नुन्नश्चतुरविजयश्चेतसि प्रस्फुरन्त्या ।
दुष्कर्मौघक्षितिधरपविं तद्गुणग्रामलेशं
स्वश्रेयोऽर्थं स्तुतिपथमनैषं यथाशक्त्यशक्तः ॥९॥

# प्रस्तावना.

सज्जनगण !

समाद्रियतां सहर्षमुपदीक्रियमाणं तीर्थङ्कराणां च्यवन-विमान-नगरी-जनक-जनन्याद्येकविंशतिपदज्ञापकमेकविंशतिस्थानाभिधानमेतद् यथार्थनामकं प्रकरणरत्नम् ।

यद्यपि प्रान्तभागेऽस्य—

इय इक्कवीसठाणा उद्धरीय सिद्धसेणसूरीहिं ।
चउवीसजिणवराणं असेससाहारणा भणिया ।

इत्येतदुल्लेखदर्शनेन श्रीसिद्धसेनसूरयोऽस्य प्रणेतार इति प्रकटमेवावसीयते, तथापीह जिनशासनवर्त्तिष्वनेकेषु गच्छेषु

१ श्रीसम्मतितर्कादिग्रन्थविधानवेधाः सुप्रसिद्धनामधेयः श्रीमत्सिद्धसेनदिवाकरः ।

२ तत्त्वार्थसूत्रटीकाकर्त्ता दिन्नगणिसन्तानीयसिंहसूरिशिष्यः सिद्धसेनसूरिः ।

३ बप्पभट्टिसूरिसन्तानीययशोभद्रसूरिगच्छभूषणयशोदेवसूरिशिष्यो धंधुकानगरे सं. ११२३ वर्षे "साहारण" शब्दाङ्कितैकादशसन्धिबन्धुरप्राकृतापभ्रंशपद्यमयविलासवईकहानामग्रन्थरत्नसूत्रधारः साधारणेति पर्वनामा सिद्धसेनसूरिः ।

४ वि. सं. ११४२ (?) वर्षे प्रवचनसारोद्धारबृहद्वृत्तिविरचयिता चन्द्रगच्छीयप्रद्युम्नसूरिपरंपरागतदेवभद्रशिष्यः सिद्धसेनसूरिः ।

५ सरस्वत्यापगातटे सिद्धपुरपत्तने सिद्धचक्र (नमस्कार) महात्म्यप्रणेता सिद्धसेनसूरिः ।

६ *श्रीसिद्धिसागर (?) सूरिसन्तानीयः सिद्धसेनसूरिः ( सं. १२९४ )

७ श्रीनाणकीयगच्छभूषा सिद्धसेनसूरिः ( सं. १४३३ )

इत्यादयो ग्रन्थकर्तृत्वेन सुविदिता अभूवन्, परमेतेषां मध्यात् कतमा अस्य प्रकरणरत्नस्य प्रणेतारः सम्भवेयुः ? कदा कतमं च महीमण्डलं मण्डयामासुरिति विशेषजिज्ञासायां "असेससाहारणा भणिया" इत्येतदुल्लेखदर्शनात् साधारणशब्दांकितकृतिकारा एवास्य विरचयितार इति सुस्पष्टमेव ।

सत्तासमयस्त्वेषां 'विलासवईकहा' विरचनकालो द्वादशशताब्दाः पूर्वार्धरूपः सम्भाव्यते ।

सत्तरिसयठ्ठाणपयरणं सोमतिलकसूरिणैतदनु वि. सं. १३८७ वर्षे विहितम् । अर्हत्स्तवः ( सं. गद्य ), शाश्वतजिनस्तुतिः ( प्रा, गा. ३४ ) एतेषां कृतितया गीयेते । "साहारणो त्ति नामं सुपसिद्धो अत्थि पुव्वनामेणं । थुइ-थोत्ता बहुभेया जस्स पढिज्जंति देसेसु ॥"

---

* श्रीमज्जिनविजयमुनिसंपादिते प्राचीनलेखसंग्रहद्वितीयभागे लेखांक ५३०-५३१ ।

इति विलासवतीकथाप्रान्त ( जेसलमेरभां. सूची गा. ऑ. सिरीझ् संस्थया मुद्रापिता पृ. १९ ) प्रशस्त्युल्लेखतोऽन्यान्यपि स्तुतिस्तोत्राणि सम्भाव्यन्ते । नमस्कारमाहात्म्यकर्ताऽयं वाऽन्यः सिद्धसेनसूरिरिति निश्चेतुं न साधनम् । सूरिवर्यस्यास्यान्याऽपि कृतिः सम्भवेत् । वरिवर्त्ति ताडपत्र ९८ लिखिताऽणहिल्लपुरद्वितीयभाण्डागारेऽस्य टीकेति जैनग्रन्थावल्या ज्ञायते, परं न तत्र बहुशो गवेषिताऽपि प्राप्तेति नूतनवृत्तिचिकीर्षां विज्ञाय मे गुरुभ्रात्रा चतुरविजयमुनिना बोधदीपिकया वृत्त्या समलमकारि ।

एतद्ग्रन्थप्रसिद्धये मयेपदिष्टैः सीनोरवास्तव्यैः

७५ शा. खीमचंद फूलचंदभाई ( मांजरोळवाळा )
२५ शा. नगीनदास नरोत्तमदास चोकसी.
२५ शा. छोटालाल हरगोविंददास ( सिमरीवाळा )

इत्येभिरुदारचित्तैर्महाशयैर्द्रव्यसाहाय्यं वितीर्णमतः प्रशस्येयमुदारताऽमीषां, अनुकरणीयोऽयं पन्था अन्यैरपि श्रीमद्भिः

प्रुफसंशोधनादि स्वयमकारि सावधानतयाऽस्य टीकाकर्त्रा तथापीह कुहचन प्रमादाचरणाज्जिनागमविरोधोऽशुद्धिश्च भवेत्तदा संशोधयन्तु परोपकारकरणरसिकान्तःकरणा मतिमन्त इति प्रार्थयते श्रीमदमरविजयमुनिक्रमकमलसेवाहेवाकी देवविजयो मुनिः ।

ता. १-७-२४. | स्थल—सीनोर. (रेवाकांठा.)

# शुद्धिपत्रकम् ।

| पृष्ठ | पंक्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|
| २ | ४ | यच्छतु | यच्छतु मे |
| २ | १० | कुवन् | कुर्वन् |
| ३ | १५ | मातर | मातरः |
| ३ | १६ | पाद रणे | पादपूरणे |
| ५ | १७ | अधस्तन | अधस्तनं |
| ७ | १७ | कुण्डग्रामं चेति | कुण्डग्रामश्चेति |
| ८ | १७ | गाथाद्वयाथः | गाथाद्वयार्थः |
| ९ | ७ | दवी १८ | देवी १८ |
| ११ | १२ | सुपाश्वस्य | सुपार्श्वस्य |
| ११ | १३ | -धनुः | -र्धनुः |
| १४ | ४ | नँवति | नँवंति |
| १४ | ५ | सँप्तति | सँप्तति |
| १४ | ८ | किमुक्त | किमुक्तं |
| १४ | १० | धमजिनः | धर्मजिनः |
| १५ | ५ | बावत्तार | बावत्तरि |
| २९ | ५ | दधिपणः | दधिपर्णः |
| ३९ | १० | मल्लिस्वामि : | मल्लिस्वामिनः |

ॐ

श्रीमद्विजयानन्दसूरिपुरन्दरचरणारविन्दाभ्यां नमः ।

श्रीसिद्धसेनसूरिविरचितम्

# श्रीएकविंशतिस्थानप्रकरणम् ।

अर्हम्

श्रेयःश्रीः सदने तनोति वसतिं यत्सेवया देहिनां
शोषं संसृतिसागरः श्रयति च व्युच्छित्तिमन्तर्द्विषः ।
पादाब्जेऽमरदैत्यभूमिपतयो भक्त्या नमन्त्यन्वहं
सानन्दं प्रणमाम्यरं सविधि तां जैनीं चतुर्विंशतिम् ॥१॥

श्रीतीर्थभर्तुस्त्रिपदीमवाप्य स्याद्वादचार्वीं भविनां हिताय ।
ये द्वादशाङ्गीमनघां प्रणिन्युर्हिताय नः सन्तु गणाधिपास्ते ॥२॥

यत्पादपद्मं हृदये निधाय भवार्त्तिशान्तिं भविनो भजन्ते ।
सज्ज्ञानदातारमरं मुनीन्द्रं तं सद्गुरुं भक्तिभरेण वन्दे ॥३॥

यस्याः कृपालाबुसमाश्रयेण
मन्दोऽपि पारं श्रयति श्रुताब्धेः ।
वाङ्मालया सा भुवनं पुनाना
सरस्वती यच्छतु सुबुद्धिम् ॥ ४ ॥

कृपापूर्णदृशैतेषां स्वान्येषां हितकाम्यया ।
श्रीएकविंशतिस्थानटीकां कुर्वे यथामति ॥५॥

शब्दार्थयोर्न काठिन्यं ग्रन्थेऽत्र विद्यते क्वचित ।
स्वपरभ्रान्तिनाशाय प्रयत्नो मे तथाप्ययम् ॥६॥

दुःप्रापमाप्य नृत्वं यतितव्यं श्रेयसे यथाशक्त्या ।
इति शिष्टगिरा कुर्वन् मूढोऽप्येनां न हास्ये स्याम् ॥७॥

इह किल चूर्णपेषं पिष्टाऽनल्पिष्ठजन्मजरामरणाधिव्याधिस्वेष्ट-विरहानिष्टसंयोगदारिद्र्याादिदुरन्तदुःखनिबन्धनघनिष्ठदुष्टकर्माष्टकानां,

निरावरणाऽप्रतिहताऽनन्तविमलकेवलालोकालोकिताविकलसकललोकालोकानां, करालकलिकालव्यालवदनविवरान्तर्वर्त्तिभव्यजन्तुजातपरित्राणकर्मकर्मठसदुपदेशपीयूषरसपूरपूरितत्रिविष्टपानां,

भक्तिभरानम्रनरसुरासुरेश्वरनिकरकिरीटकोटिस्तबकितरत्नरोचिर्निचयरोचिष्णुतरचरणारविन्दयुगलानामासन्नोपकारिणामृषभादिचतु-

विंशतितीर्थंकृतामेकविंशतिस्थानान्याचिख्यासुः श्रीसिद्धसेनसूरिशेखरः प्रथमं स्थानद्वारगाथाद्वितयमाह—

**चवणविमाणा १ नयरी २**
**जणया ३ जणणीउ ४ रिक्ख ५ रासी ६ य।**
**लंछण ७ पमाण ८ माऊ ९**
**वण्णं १० तर ११ दिक्ख १२ तव १३ भिक्खा १४ ॥१॥**

**नाणठाणं १५ गणहर १६**
**मुणि १७ अज्जियसंख १८ जक्ख १९ देवीओ २०।**
**सिद्धिठाणं २१ च कमेण साहिमो जिणवरिंदाणं ॥२॥**

व्याख्या—'चवण' इत्यादि, जिना-अवधिज्ञानिप्रभृतयस्तेषां वराः केवलिनस्तेषामिन्द्रा इवेन्द्राः पूज्यत्वात् जिनवरेन्द्रास्ते चातीतानागतवर्त्तमानकालापेक्षयाऽनन्तशस्तथापि सांप्रतकालीनावसर्पिण्यां सञ्जातत्वादासन्नोपकारकारित्वाद् वृषभादिवर्द्धमानान्ताश्चतुर्विंशतिस्तीर्थकृत एवात्र विवक्षितास्तेषां च्यवनविमानानि १, जन्मनगर्यः २, जनकाः-पितरः ३, जनन्यो-मातरः ४, 'तुः' पुनरर्थे, ऋक्षाणि-जन्मनक्षत्राणि ५, जन्मनक्षत्रानुसारेण मेषादयो राशयः ६, 'चः' पादपूरणे, लाञ्छनानि-ऊरुस्थितरोमरूपाणि ध्वजचरणादिस्थितानि वा चिन्हानि ७, '**पमाणं**'

शरीरदैर्घ्यप्रमाणं ८, आयुः-सर्वायुष्कं९, वर्णा-रक्तादयः १०, ततो 'अं-तर' त्ति, जिनांतराणि-एकस्माज्जिनादपरो जिनः कियता कालव्यवधानेन सिद्ध इत्येवंरूपाणि ११, दीक्षा-व्रतादानं, इह हि दीक्षेति सामान्य-शब्दनिर्देशात् यस्मिन् वयसि यावता श्रमणपरिवारेण यत्र स्थाने जिनैर्दीक्षा गृहीता तत्सर्वं वक्ष्यति १२, तपः-दीक्षाग्रहणकालीनं तपः १३, भिक्षा-प्रथमपारणाः अत्र च प्रसङ्गतः कियत्तपोऽन्ते केन द्रव्येण किंनामधेयेन पुंसा भगवतामाद्यपारणकानि कारितानीत्यपि दर्श-यिष्यति १४, ज्ञानस्थानं-केवलज्ञानोत्पत्तिस्थानं, उपलक्षणत्वात् यत्तपोऽन्ते यद्वृक्षाधश्च केवलज्ञानमुत्पेदे तदप्यभिधास्यति १५, तथा जिनानां सम्बन्धिनो गणधराश्च मुनयश्च आर्यिकाश्चेति समाहार-द्वन्द्वस्ततः पर्यन्तवर्ति ' संख ' इति शब्दसम्बन्धाज्जिनानां ऋष-भादीनां प्रत्येकं ये गणधरास्तेषां सङ्ख्या १६, तथा तेषामेव ये मुनयः—साधवस्तेषां सङ्ख्या १७, तथा तेषामेव या आर्यिकाः—साध्व्यस्तासां सङ्ख्या १८, तथा जिनानां यक्षाः १९, देव्यः—शासनदेवताः २०, तथा सिद्धिस्थानं—मोक्षगमनभूमिः, इहापि सप्रसङ्गं येन तपसा यावन्मुनिपरिवृताः शिवं भेजुस्तदपि प्रकटी-करिष्यति २१, 'चः' प्राग्वत्, इत्येकविंशतिस्थानानि क्रमेण परिपाट्या 'साहिमो' कथयिष्याम इति गाथाद्वयार्थः ॥ १ । २ ॥

सांप्रतं 'यथोद्देशं निर्देश' इति न्यायात् 'चवणविमाण' त्ति प्रथमं स्थानमाह—

**सव्वट्ठ १ विजय २ उवरिम-**
**हिट्ठिमगेविज्ज ३ दो जयंतं ४। ५ तु।**
**उवरिमउवरिमगेविज्ज ६**
**मज्झिमोवरिमगेविज्जे ७ ॥ ३ ॥**

**तह वेजयन्त ८ आणय ९**
**पाणयकप्पं १० च अच्चुयं ११ चेव।**
**पाणय १२ सहसारं १३ पा-**
**णयं च १४ विजयं १५ च सव्वट्ठं १६ ॥४॥**

**दो सव्वट्ठ १७। १८ जयंतं १९**
**अवराइय २० पाणयं २१ तहा कप्पं।**
**अवराइय २२ दो पाणय २३। २४**
**पुव्वविमाणा जिणिंदाणं ॥ ५ ॥**

व्याख्या—'सव्वट्ठ' इत्यादि, तत्र भगवत आदितीर्थकरस्य सर्वार्थसिद्धिः च्यवनविमानम् १, अजितस्य विजयः—प्रथममनुत्तर-विमानम् २, संभवनाथस्योपरितनग्रैवेयकत्रिकस्याऽधस्तन प्रथमम् ३,

'दो जयंत' त्ति अभिनन्दनसुमतिनाथयोर्जयन्ताख्यं तृतीयमनुत्तरविमानम् ४।५, 'तु' व्यवहितक्रमे, पद्मप्रभस्योपरितनग्रैवेयकत्रिकस्योपरितनं विमानम् ६, सुपार्श्वस्य मध्यमग्रैवेयकत्रिकस्योपरितनं विमानम् ७, तथा चन्द्रप्रभस्य वैजयन्ताभिधानं द्वितीयमनुत्तरविमानम् ८, सुविधिस्वामिन आनतकल्पं नवमो देवलोकः ९, श्रीशीतलनाथस्य प्राणतकल्पं दशमो देवलोकः १०, 'चः' पुनरर्थे, श्रेयांसस्याऽच्युताख्यो द्वादशो देवलोकः ११, चैवेतिपूरणे, वासुपूज्यस्य प्राणतकल्पं १२, विमलजिनस्य सहस्रारकल्पमष्टमं स्वर्गं १३, अनन्तनाथस्य प्राणतकल्पं १४, चशब्दो भिन्नक्रमे, धर्मजिनस्य विजयविमानम् १५, चः प्राग्वत्, शान्तेः सर्वार्थसिद्धिः १६, 'दो सव्वट्ठ' त्ति, द्वयोः कुन्थुनाथाऽरनाथयोः सर्वार्थसिद्धिः १७। १८, मल्लेर्जयन्तविमानं १९, मुनिसुव्रतस्याऽपराजिताख्यं चतुर्थमनुत्तरविमानम् २०, नमिनाथस्य प्राणतकल्पम् २१, तथा अरिष्टनेमेरपराजितविमानम् २२, 'दो पाणय' त्ति, द्वयोः पार्श्वनाथवर्द्धमानजिनयोः प्राणतकल्प २३।२४ मिति गाथात्रयार्थः ॥ ३ । ४ । ५ ॥

इदानी 'नयरी' ति द्वितीयस्थानप्रतिपिपादयिषयाऽऽह—

**नयरी विणीय १ उज्झा २**
**सावत्थी ३ विणी १ ४ कोसलपुरं ५ च ।**

कोसंबी ६ वाणारसी ७
चंदपुरी ८ तह य काकंदी ९ ॥ ६ ॥
भद्दिलपुर १० सीहपुरं ११
चंपा १२ कंपिल्लपुर १३ मउज्झा १४ य ।
रयणउर १५ हत्थिणाउर १६
गयउर १७ तह चेव नागउरं १८ ॥ ७ ॥
मिहिला १९ रायगिहं २० चिय
मिहिलानयरी २१ य सोरियपुरं २२ च ।
वाराणसी २३ य तह कुंड-
गाम २४ जिणजम्मनयरीओ ॥ ८ ॥

व्याख्या—विनीता १, अयोध्या २, श्रावस्ती ३, विनीता ४, कौशलपुरं ५, कौशाम्बी ६, वाराणशी ७, चन्द्रपुरी ८, काकन्दी ९, भद्दिलपुरं १०, सिंहपुरं ११, चम्पा १२, काम्पिल्यपुरं १३, अयोध्या १४, रत्नपुरं १५, हस्तिनापुरं १६, गजपुरं-हस्तिनागपुरमेव १७, नागपुरं—तदेव १८, मिथिला १९, राजगृहनगरं २०, मिथिला २१, शौरिपुरं २२, वाराणशी २३, क्षत्रियकुंडग्रामं २४ चेति ऋषभादिवर्द्धमानपर्यन्तानां चतुर्विंशतेस्तीर्थकृतां जन्मनगर्यः क्रमेण प्रतिपत्तव्या इति गाथात्रयार्थः ॥६।७।८॥

इदानीं 'जणया' ति तृतीयस्थानमभिधित्सुराह—

**नाभी १ जियसत्तु २ जिया-**
**रि ३ संवरो ४ मेह ५ धर ६ पइट्ठे ७ य।**
**महसेण ८ सुगीव ९ दढरह १०**
**विण्हू ११ वसुपुज्ज १२ कयवम्मे १३ ॥ ९॥**
**सिह १४ भाणु १५ विस्ससेणे १६**
**सूर १७ सुदंसण १८ कुंभ १९ सुहमित्तो २०।**
**विजओ २१ समुद्दविजया २२-**
**ससेण २३ सिद्धत्थ २४ जिणपियरो ॥ १० ॥**

व्याख्या—आदितीर्थकृत ऋषभस्वामिनः पिता नाभिराजा १, एवं क्रमेण शेषाणां जितशत्रुः २, जितारिः ३, संवरः ४, मेघः ५, धरः ६, प्रतिष्ठः ७, महासेनः ८, सुग्रीवः ९, दृढरथः १०, विष्णुः ११, वसुपूज्यः १२, कृतवर्म्मा १३, सिंहः १४, भानुः १५, विश्वसेनः १६, शूरः १७, सुदर्शनः १८, कुम्भः १९, सुमित्रः २०, विजयः २१, समुद्रविजयः २२, अश्वसेनः २३, सिद्धार्थः २४, नृपतिशब्दः सर्वत्र प्रयोज्यः। इत्येते जिनानां पितरो जनका विज्ञेया इति गाथाद्वयार्थः ॥९।१०॥

इदानीं 'जणणी' ति चतुर्थस्थानमभिधातुकाम आह—

मरुदेवी १ विजयदेवी २
सेणा ३ सिद्धत्थ ४ मंगल ५ सुसीमा ६ ।
पुहवी ७ लक्खण ८ रामा ९
नंदा १० विण्हू ११ जया १२ सामा १३॥११॥

सुजसा १४ सुवय १५ अइरा १६
सिरिया १७ देवी १८ पभावई १९ पउमा २०।
वप्पा २१ सिवा २२ य वम्मा २३
तिसलादेवी य २४ जिणमाया॥ १२ ॥

व्याख्या—भगवत ऋषभप्रभोर्माता मरुदेवी १, एवमजितादिशेषतीर्थकृतां क्रमेण विजया २, सेना ३, सिद्धार्था ४, मङ्गला ५, सुसीमा ६, पृथिवी ७, लक्ष्मणा ८, रामा ९, नन्दा १०, विष्णुः ११, जया १२, श्यामा १३, सुयशाः १४, सुव्रता १५, अचिरा १६, श्रीः १७, देवी १८, प्रभावती १९, पद्मावती २०, वप्रा २१, शिवा २२, वामा २३, त्रिशलादेवी २४, चेत्येता मातरोऽवगन्तव्याः इति गाथाद्वयार्थः॥ ११। १२॥

इदानीं ' रिक्ख ' त्ति पञ्चमस्याननिरूपणायाऽऽह—

**उत्तरसाढा १ रोहिणी २**
**मियसीस ३ पुणव्वसू ४ महा ५ चित्ता ६ ।**
**वेसाह ७ णुराह ८ मूल ९**
**पुव्व १० सवणो ११ सयभिसा १२ य ॥१३॥**
**उत्तरभद्दव १३ रेवई १४**
**पुस्स १५ भरणी १६ कत्तिया १७ रेवई १८ य ।**
**अस्सिणि १९ सवणो २० अस्सिणि २१**
**चित्त २२ विसाहा २३ य उत्तरा २४ रिक्खा ॥१४॥**

व्याख्या—प्रथमजिनेशितुर्नाभेयस्य जन्मनक्षत्रमुत्तराषाढा १, एवमजितादीनां क्रमेण रोहिणी २, मृगशीर्षं ३, पुनर्वसू ४, मघा ५, चित्रा ६, विशाखा ७, अनुराधा ८, मूलं ९, पूर्वाशब्देन पूर्वाषाढैवात्र ज्ञेया, अग्रेतनप्रकरणे शीतलस्वामिनो धनूराशेर्वक्ष्य-माणत्वात् १०, श्रवणं ११, शतभिषक् १२, उत्तराभाद्रपदा १३, रेवती १४, पुष्यं १५, भरणी १६, कृत्तिका १७, रेवती १८, अश्विनी १९, श्रवणं २०, अश्विनी २१, चित्रा २२, विशाखा २३, उत्तराफाल्गुनी २४, चेतिजन्मनक्षत्राणि ज्ञेयानीति गाथाद्वयार्थः ॥ १३ । १४

इदानीं 'रासि' त्ति षष्ठस्थानव्याचिख्यासयाऽऽह—

**धणुगो १ विसो २ दु ३।४ मिहुणो**
**सीहो ५ कन्ना ६ तुला ७ अली ८ चेव।**
**दो धणु ९।१० मयरो ११ कुंभो १२**
**दो मीणा १३।१४ ककडो १५ मेसो १६॥१५॥**
**विस १७ मीण १८ मेस १९ मयरो २०**
**मेसो २१ कन्ना २२ पुणो तुला २३ कन्ना २४।**
**उसभाईण जिणाणं एयाओ हुंति रासीओ ॥ १६ ॥**

व्याख्या—'धणुगो' इत्यादि, ऋषभादीनां जिनानामिमे वक्ष्यमाणा राशयो ज्ञेया स्तथाहि-भगवत ऋषभस्वामिनो राशिर्धनुः १, अजितस्य वृषः २, द्वयोः सम्भवाऽभिनन्दनयोर्मिथुनम् ३।४। सुमतेः सिंहः ५, पद्मप्रभस्य कन्या ६, सुपार्श्वस्य तुला ७, चन्द्रप्रभस्य वृश्चिकः ८, ततो द्वयोः सुविधिशीतलजिनयोर्धनुः ९।१०, श्रेयांसस्य मकरः ११, वासुपूज्यस्य कुम्भः १२, द्वयोर्विमलाऽनन्तजितोर्मीनराशिः १३।१४। धर्मजिनस्य कर्कः १५, शान्तेर्मेषः १६, कुन्थुजिनस्य वृषः १७, अरजिनस्य मीनः १८, मल्लिस्वामिनो मेषः १९, मुनिसुव्रतस्य मकरः २०, नमिजिनस्य मेषः

२१, अरिष्टनेमिनः कन्या २२, पार्श्वप्रभोस्तुला २३, श्रमणस्य भगवतो महावीरस्य कन्याराशि २४ रिति क्रमेण नाभेयादिजिनानां राशयो बोद्धव्या इति गाथाद्वयार्थः ॥ १५ । १६ ॥

इदानीं ' लंछण 'त्ति सप्तमं स्थानं प्रतिपिपादयिषुराह—

**वसह १ गय २ तुरय ३ वानर ४**
**कुंचू ५ कमलं ६ च सत्थिओ ७ चंदो ८ ।**
**मयर ९ सिरिवच्छ १० गंडय ११**
**महिस १२ वराहो १३ य सेणो १४ य ॥१७॥**
**वज्जं १५ हरिणो १६ छगलो १७**
**नंदावत्तो १८ य कलस १९ कुम्मो २० य ।**
**नीलुप्पल २१ संख २२ फणी २३**
**सीहो २४ य जिणाण चिंधाइं ॥ १८ ॥**

व्याख्या—' वसह ' इत्यादि, वृषभः १, गजः २, तुरगः-अश्वः ३, वानरः-कपिः ४, क्रौञ्चः—पक्षिविशेषः ५, कमलं-रक्तकमलं ६, स्वस्तिकः ७, चन्द्रः ८, मकरः-मत्स्यविशेषः ९, श्रीवत्सः-उत्तमपुरुषालंकारः १०, गंडकः-खड्गिः ११, महिषः १२, वराहः-शूकरः १३, श्येनः—पक्षिविशेषः १४, वज्रं-इन्द्रायुधम्

१५, हरिणः १६, छगलः-अजः १७, नन्दावर्त्तः-स्वस्तिकविशेषः १८, कलशः १९, कुर्मः-कच्छपः २०, नीलोत्पलं २१, शङ्खः २२, फणी २३, सिंह २४, श्चेति जिनानां नाभेयादीनां चिन्हानि-लाञ्छनानि विज्ञेयानीति गाथाद्वयार्थः ॥ १७ । १८ ॥

इदानीं ' पमाण 'त्ति अष्टमस्थानाऽभिधित्सयाऽऽह—

**पंचधणूसय पढमो कमेण पंचासहीण जा सुविही ।**
**दसहीण जा अणंतो पंचूणा जाव जिणनेमी ॥ १९ ॥**
**नवहत्थपमाणो पाससामिओ सत्तहत्थ जिणवीरो ।**
**उस्सेहअंगुलेणं सरीरमाणं जिणवराणं ॥ २० ॥**

व्याख्या—'पंच' इत्यादि, तत्र प्रथमो जिनः—ऋषभस्वामी पञ्च[500]धनुःशतोच्छ्रयः १, ततोऽजितादयो जिनाः क्रमेण परिपाट्या धनुषां पञ्चाशता हीना यावत् नवमः सुविधिजिनः, कोऽर्थः ? पञ्चभ्यो धनुःशतेभ्यः पञ्चाशत् पञ्चाशत् पात्यन्ते, ततोऽजितः सार्द्धचतु[450]श्चापशतोच्चः २, चतुश्चा[400]पशतोच्चाङ्गः सम्भवः ३, धनुः-सार्द्धत्रि[350]शतोच्चोऽभिनन्दनजिनः ४, धनुः[300]शतत्रयोत्तुङ्गः सुमतिः ५, सार्द्धचापद्वि[250]शत्युच्चः पद्मप्रभः ६, धनुः[200]शतद्वयोत्तुङ्गः सुपार्श्वः ७, सार्द्धधन्व[150]शतोच्छ्रयश्चन्द्रप्रभः ८, धनुः[100]शतोन्नतः सुविधिः ९,

'दसहीण जा अणंतो' त्ति, सुविधेरनन्तरं यावदनन्तजिनस्तावत् तीर्थकृतस्तनुमानविषये क्रमेण दशभिर्दशभिर्धनुर्भिर्हीना वक्तव्याः, ततोऽयमभिप्रायः, सुविधिजिनतनुमानात् धनुःशतलक्षणाद् दशस्वपनीतेषु नवतिचापोच्चः शीतलः १०, अशीतिकोदण्डकायः श्रेयांसः ११, सप्ततिचापोच्चाङ्गयष्टिर्वासुपूज्यः १२, षष्टिचापोन्नतो विमलजिनः १३, पञ्चाशद्धनुरुन्नतोऽनन्तजित् १४, 'पंचूणा जाव जिणनेमी' ति, अनन्तजिनादनन्तरं तीथकृतः क्रमेण पञ्चभिः पञ्चभिर्धनुर्भिर्न्यूनास्तावत् वक्तव्या यावन्नेमिजिनः, किमुक्त भवति ?, अनन्तजिनतनुमानात् पञ्चाशद्धनुःस्वरूपात् पञ्चसूद्धृतेषु पञ्चचत्वारिंशच्चापोन्नतो धमजिनः १५, चत्वारिंशच्चापोन्नतः शान्तिः १६, पञ्चत्रिंशद्धनुर्मितः कुन्थुः १७, त्रिंशच्चापोन्नतोऽरनाथः १८, पञ्चविंशतिचापोच्चो मल्लिस्वामी १९, विंशतिधनुरुन्नतो मुनिसुव्रतः २०, पञ्चदशधनुस्तुङ्गो नमिनाथः २१, दशधनुस्तुङ्गोऽरिष्टनेमिः २२, नवहस्तोन्नतवपुः पार्श्वनाथः २३, सप्तहस्तोच्छ्रयः श्रीवर्द्धमानजिनः २४, इत्येवमुत्सेधाङ्गुलेन—'परमाणू रहरेणु तसरेणु' इत्यादिक्रमनिष्पन्नेन शरीरमानमिदं जिनवराणां विज्ञेयमिति गाथाद्वयार्थः ॥ १९ । २० ॥

इदानीं 'आउ' त्ति नवमं स्थानमधिकृत्याऽऽह—

चुलसीई १ बावत्तरि २

सट्ठी ३ पन्नास ४ तह य चालीसा ५ ।

तीसा ६ वीसा ७ दस ८ दो ९

एगं १० चिय पुव्वलक्खाइं ॥ २१ ॥

चुलसीइ ११ बावत्तार १२

सट्ठि १३ तीस १४ दस १५ एग १६ वरिसलक्खाइं ।

पणनवइ १७ चउरासी १८

पणपण्णा १९ तीस २० दस २१ एगं २२ ॥२२॥

एए वरिससहस्सा

सयं च वरिसाण पाससामिस्स २३ ।

बावत्तरि वरिसाइं २४ आऊ सिरिवद्धमाणस्स ॥२३॥

व्याख्या—'चुलसी' इत्यादि, तत्र प्रथमतीर्थेशितुश्चतुरशीतिः पूर्वलक्षाणि सर्वायुः १, द्वासप्ततिः पूर्वलक्षाण्यजितस्य २, सम्भवप्रभोः षष्टिपूर्वलक्षाः ३, अभिनन्दनस्य पूर्वाणां पञ्चाशल्लक्षाः ४, सुमतेश्चत्वारिंशल्लक्षाः पूर्वाणाम् ५, पद्मप्रभप्रभोः पूर्वाणां त्रिंशल्लक्षाः ६, सुपार्श्वस्य विंशतिर्लक्षाः पूर्वाणाम् ७, चन्द्रप्रभस्य पूर्वाणां दशलक्षाः ८, सुविधिस्वामिनः पूर्वलक्षे द्वे ९, शीतलप्रभोः पूर्वाणां लक्षमेकं १०, श्रेयांसस्य चतुरशीतिर्वर्षलक्षाणि ११, द्वासप्ततिर्वर्षलक्षा वासु-

पुज्यस्य १२, षष्टिर्वर्षलक्षाणि विमलस्य १३, अनन्तजितस्त्रिंशद्वर्षलक्षाणि १४, धर्मजिनस्य वर्षाणां दशलक्षाणि १५, शान्तेर्वर्षलक्षमेकं १६, कुन्थुनाथस्य पञ्चनवतिर्वर्षसहस्राणि १७, चतुरशीतिर्वर्षसहस्राण्यरस्य १८, मल्लेः पञ्चपञ्चाशद्वर्षसहस्राणि १९, त्रिंशद्वर्षसहस्रा मुनिसुव्रतस्य २०, नमेर्दशवर्षसहस्राणि २१, अरिष्टनेमिनो वर्षसहस्रमेकं २२, वर्षशतं पार्श्वप्रभोः २३, द्वासप्ततिर्वर्षाणि वर्द्धमानस्वामिन २४, इति गाथात्रयार्थः ॥ २१ । २२ । २३ ॥

इदानीं 'वण्ण' त्ति दशमं स्थानमुपदर्शयन्नाह—

**पंच जिण कणयवन्ना ५**
**रत्तो ६ हेमप्पहो ७ य दो धवला ८ । ९ ।**
**दो १० । ११ चामीयरवण्णा**
**रत्तो १२ छच्चेव कणयाभा १८ ॥ २४ ॥**
**मरगयनीलो १९ अलिसा-**
**मलो २० य कंचणनिभो २१ य अलिसामो २२ ।**
**तहय तमालदलाभो २३**
**सुवण्णवण्णो य जिणवीरो २४ ॥ २५ ॥**

व्याख्या—'पंच' इत्यादि, तत्राद्याः ऋषभाऽजितसम्भ-

वाऽभिनन्दनसुमतिनाथनामानः पञ्च जिनाः कनकसमानवर्णाः५, ततः पद्मप्रभो रक्तवर्णः ६, सुपार्श्वो हेमप्रभः—सुवर्णसवर्णवर्णः७, द्वौ चन्द्रप्रभसुविधी जिनौ धवलौ—श्वेतवर्णौ ८–९, ततो द्वौ शीतलश्रेयांसौ चामीकरवर्णौ—स्वर्णाभौ १०–११, वासुपूज्यो रक्तः १२, ततः षट् विमलाऽनन्तधर्मशान्तिकुन्थ्वरनाथनामधेयाः कनकवर्णाः१८,मल्लिर्मरकततुल्यनीलवर्णः १९, अलिर्भृङ्गस्तद्वत्श्यामलो मुनिसुव्रतः २०, नमिजिनः काञ्चनसदृशः २१, अरिष्टनेमिश्चाऽलिश्यामलः २२, तथा पार्श्वनाथस्तमालदलाभः—तमालतरोः पत्रवन्नीलवर्णः २३ चः पुनरर्थे, वीरजिनः सुवर्णवर्णः २४ इतिगाथाद्वयार्थः ॥२४।२५॥

इदानीं ' अंतर ' त्ति एकादशं स्थानं व्याचिख्यासिषुराह—

**अयराणि कोडिलक्खा**
**पन्नासं १ तीस २ दस ३ य नव ४ चेव ।**
**कोडिसहस्सा नवई ५**
**नव य सहस्सा ६ नवसयाइं ७ ॥ २६ ॥**

**नवई पुण कोडीओ ८**
**नव कोडी ९ कोडिसागरसऊणा ।**
**छावट्ठीलक्खेहिं छवीससहस्सवरिसेहिं १० ॥ २७ ॥**

चउपन्न सागरेहिं ११
तीस १२ नव १३ चारि १४ तिन्नि ऊणाहिं ।
पलियतिचउभागेहिं १५
पलियद्धं १६ पलियचउभागे १७ ॥ २८ ॥

कोडिसहस्सूणा सा
वरिसाणं तं च अंतरमरस्स १८ ।
चउपन्न वरिसलक्खा १९
छ २० प्पंच २१ य वरिसलक्खाइं ॥ २९ ॥

तेसीइं च सहस्सा सत्त सयाइं च वरिसपन्नासं ।
नेमिस्संतरमेयं २२ पासस्सड्ढाइयसयाइं २३ ॥ ३० ॥

व्याख्या—'अयराणि' त्ति, तत्र ऋषभजिनमोक्षतः सागराणां पञ्चाशत्कोटिलक्षेषु गतेषु अजितस्वामिनो मोक्षः १, ततस्त्रिंशत्कोटिलक्षेषु सागराणां गतेषु सम्भवजिनस्य निर्वाणम् २, तदनन्तरं सागराणां दशसु कोटिलक्षेषु व्यतीतेषु अभिनन्दनजिननिर्वाणम् ३, तदनन्तरं सागराणां नवकोटिलक्षेषु गलितेषु सुमतिस्वामिनिर्वाणम् ४, तदनन्तरं सागरोपमकोटीनां नवतिसहस्रेषु व्यपगतेषु श्रीपद्मप्रभनिर्वाणम् ५, तदनन्तरं नवसु सहस्रेषु सागरो-

पमकोटीनां यातेषु श्रीसुपार्श्वजिननिर्वाणम् ६, तद[illegible]
सागरोपमकोटीशतेषु समतीतेषु चंद्रप्रभनिर्वाणम् ७, तदनन्तरं
नवतौ सागरोपमकोटीनां गतायां सुविधिस्वामिनिर्वाणम् ८,
तदनन्तरं नवसु[९] सागरोपमकोटीष्वतीतासु श्रीशीतलजिननिर्वाणम् ९,
ततः सागरोपमैकशत[१००]षट्षष्टि[६६]वर्षलक्षषड्विंशति[२६]सहस्रोनायां सागरोपम-
कोटाकोट्यां गतायां श्रीश्रेयांसनिश्रेयसः १०, ततश्चतुष्पञ्चाशति[५४]
सागरेषु यातेषु श्रीवासुपूज्यजिनमोक्षः ११, ततस्त्रिंशत्[३०]सङ्ख्येषु
सागरेषु व्यतीतेषु श्रीविमलजिननिर्वाणम् १२, तदनन्तरं नवसु[९]
सागरेषु समतीतेष्वनन्तजितो मोक्षः १३, तदनन्तरं चतुर्ष्वितरेषु[४]
व्यतिक्रान्तेषु श्रीधर्मजिननिर्वाणम् १४, तदनन्तरं चतुर्भागीकृतस्य
पल्यस्य त्रिभिर्भागैर्न्यूनेषु त्रिषु[३] सागरेषु गतेषु श्रीशान्तिजिन-
निर्वाणम् १५, तदनन्तरं पल्योपमार्द्धेन कुन्थुनाथमोक्षः १६, ततः
कोटिसहस्रवर्षैन्यूने एकस्मिन् पल्योपमचतुर्भागे गतेऽरजिननिर्वा-
णम् १७, तदनन्तरं वर्षकोटिसहस्रेऽतिक्रान्ते मल्लिस्वामिमोक्षः
१८, तदनन्तरं वर्षाणां चतुष्पञ्चाशति[५४] लक्षेषु गतेषु श्रीमुनि-
सुव्रतनिर्वाणम् १९, तदनन्तरं वर्षाणां षट्सु[६] लक्षेषु गतेषु श्रीनमि-
नाथनिर्वाणम् २०, तदनन्तरं पञ्चसु[५] वर्षलक्षेषु व्यतिक्रान्तेषु
श्रीनेमिनाथनिर्वाणम् २१, तदनन्तरं सार्द्धसप्तशतैः[७५०] समधिकेषु

[८३]त्र्यशीतिवर्षसहस्रेषु समतीतेषु पार्श्वप्रभुनिर्वाणम् २२, तदनन्तरं सार्द्धं [२५०]वर्षशतद्वये गते सति श्रीवर्द्धमानस्वामिनः परमानन्दपदप्राप्तिरिति गाथापञ्चकार्थः ॥ २६ । २७ । २८ । २९ । ३०॥

अथाऽऽद्यन्तजिनयोः ऋषभवीरस्वामिनोरन्तरकालमाह—

**उसभजिणाओ वीरो जाओ अयराण कोडिकोडीए ।**
**बायालीससहस्सेहिं नवरं वरिसाण ऊणाए ॥ ३१ ॥**

व्याख्या—'उसभ'त्ति, ऋषभजिनात् [४२०००]द्विचत्वारिंशद्वर्षसहस्रैरूनायां सागरोपमकोटाकोट्यां गतायां वीरश्चरमतीर्थपतिर्जातः सिद्ध इति गाथार्थः । '**उसभजिणाओ**'इत्यत्र पञ्चमी मर्यादायां, ततो धातूनामनेकार्थत्वात् जातः सिद्ध इत्यर्थः कार्यो नतु समुत्पन्न इति, यदाह प्रवचनसारोद्धारवृहद्वृत्तिकारः"**उसभसामिणो**"इत्यादिपदेष्वऽवधौ पञ्चमी, अवधिश्च द्वेधा, अभिविधिर्मर्यादा च, तत्र यद्यभिविधौ पञ्चमीतिकृत्वा समुत्पन्नो जात इति व्याख्यायते तदा ऋषभस्वाम्यादिजन्मकालाद् यथोक्तमजितादिजन्मकालमानं स्यात् , ततश्च ऋषभस्वामिनः सर्वायुःकालमानेनाऽधिकेषु दुःषमसुषमारकस्यैकोननवतिपक्षेष्ववशिष्यमाणेषु श्रीमहावीरस्वामिनः सिद्धिः प्रसज्येत, आगमे तु अन्यूनाधिकेष्वेकोननवतिपक्षेष्ववशेषेषु श्रीमहावीरसिद्धिरुक्तेत्यागमविरो-

धप्रसङ्गेन नाऽत्राऽभिविधौ पञ्चमी, किन्तु मर्यादायामेव, तत्राऽपि यदि समुत्पन्नो जात इति व्याख्यायते तदा ऋषभस्वाम्यादिनिर्वाणकालाद् यथोक्तमजितादिजिनजन्मकालमानं स्यात्, ततश्च यथोक्तजिनान्तराणां कालमानैरेव चतुर्थारकः परिपूर्णः, श्रीमदजितादिजिनत्रयोविंशतेः सर्वायुःकालमानं तु जिनान्तरकालेऽसङ्ग्रहीतत्वात् तदधिकमापद्यत इत्यतोऽग्रेतनोत्सर्पिण्यां श्रीमन्महावीरसिद्धिः प्रसज्येत, न चैतदिष्टं, तस्मात् ऋषभस्वाम्यादिनिर्वाणाद् यथोक्तकालमानेन अजितादयः समुत्पन्नाः– सिद्धाः इत्येवं व्याख्यातव्यं, नाऽन्यथेति. ”

साम्प्रतं सप्रसङ्गं तीर्थव्युच्छित्तिं व्यक्तीकुर्वन्नाह—

पुरिमंतिमअट्ठट्ठंतरेसु तित्थस्स नत्थि वुच्छेओ ।
मज्झिल्लएसु सत्तसु इत्तियकालं तु वुच्छेओ ॥ ३२ ॥
चउभागो १ चउभागो २
तिन्नि य चउभाग ३ पलियचउभागो ४ ।
तिन्नेव य चउभागा ५
चउत्थभागो ६ य चउभागो ७ ॥ ३३ ॥

व्याख्या—‘ पुरि ’ इत्यादि, इहहि चतुर्विंशतेस्तीर्थकृतां

त्रयोविंशतिरेवाऽन्तराणि भवन्ति, यथा चतसृणामङ्गुलीनां त्रीण्येवाऽन्तराणि, तत्र पूर्वेषु ऋषभादीनां सुविधिपर्यंतानां नवानां तीर्थकृतां सम्बन्धिष्वष्टसु, अन्तिमेषु च शान्तिनाथादीनां महावीरान्तानां नवानां जिनानां सम्बन्धिष्वष्टस्वन्तरेषु '**तीर्थस्य**' चतुर्वर्णस्य श्रमणसङ्घस्य नास्ति व्यवच्छेदः, '**मज्झिल्लएसु**' त्ति, मध्यवर्त्तिषु पुनः सुविधिप्रभृतीनां शान्तिनाथपर्यन्तानां तीर्थकृतामन्तरेषु सप्तस्वेतावन्मात्रं वक्ष्यमाणकालं यावत्तीर्थस्य व्यवच्छेदः, तदेवाह–'**चउभाग**' इत्यादि, सुविधिशीतलयोरन्तरे पल्योपमस्य चतुर्भागीकृतस्यैकश्चतुर्भागस्तावत्कालं तीर्थव्यवच्छेदः अर्हद्धर्मवार्त्ताऽपि तत्र नेष्टेत्यर्थः १, तथा शीतलश्रेयांसयोरन्तरे पल्योपमस्य चतुर्भागीकृतस्य चतुर्भागस्तीर्थव्यवच्छेदः २, तथा श्रेयांसवासुपूज्ययोरन्तरे पल्योपमसंबन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः ३, तथा वासुपूज्यविमलयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्युच्छेदः ४, तथा विमलाऽनन्तजिनयोरन्तरे पल्योपमसम्बन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः ५, तथाऽनन्तधर्मजिनयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः ६, तथा धर्मशान्तिनाथयोरन्तरे पल्योपमचतुर्भागस्तीर्थव्यवच्छेदः ७ इति सर्वाग्रेणभागमीलने त्रीणि पल्योपमान्येकचतुर्भागहीनानि जातानि, केचिदेतान्येकादीनि पल्योपमानि ब्रुवंति, यदाह सप्ततिशतस्थानप्र-

करणकृत् ' त्रिंति त्ते इअ पलिए ' इति, गतमेकादशमन्तरस्थानम् ॥ ३२ । ३३ ॥

इदानीं ' दिक्ख 'त्ति द्वादशं स्थानं व्याख्यानयन्नाह—

**वसुपुज्ज मल्लि नेमी पासो वीरो कुमारपव्वइया ।**
**रज्जं काउं सेसा मल्ली नेमी अपरिणीया ॥ ३४ ॥**

व्याख्या—' वसु ' इत्यादि, वासुपूज्यो मल्लिस्वामी नेमिजिनः पार्श्वो वीरश्चैते पञ्च कुमारा-अव्यूढराज्यभाराः प्रव्रजिता-दीक्षां गृहीतवन्तः, शेषा एकोनविंशतिर्नाभेयाद्या राज्यं परिपाल्य व्रतं भेजुः, तथा मल्लिर्नेमी चैतौ द्वौ अपरिणीतौ—अविवाहितौ प्रव्रजितौ, अन्ये द्वाविंशतिर्जिनाः कृतपाणिग्रहणाः प्राव्राजिषुरिति गाथार्थः ॥३४॥

साम्प्रतं ये यावता परिवारेण प्रव्रजितास्तद्दर्शयन्नाह—

**चउसहस्सजुओ उसहो**
**एगो वीरो सहस्ससंजुआ सेसा ।**
**मल्ली पासो तिहिं तिहिं**
**सएहिं छहिं वासुपुज्जजिणो ॥ ३५ ॥**

व्याख्या—' चउ ' इत्यादि, ऋषभः प्रथमजिनश्चतुर्भिः

पुरुषसहस्रैः सह व्रतं जग्राह, वीरो वर्द्धमानजिन एकः—न केनाऽपि सह प्राव्राजीदित्यर्थः, पार्श्वनाथो मल्लिश्च त्रिभि[300]स्त्रिभिः[300] शतैः व्रतमग्रहीत्, अत्र च मल्लिस्वामी स्त्रीणां पुरुषाणां च प्रत्येकं त्रिभिस्त्रिभिः शतैः सह प्रव्रजितः, ततो मिलितानि षट् शतानि भवन्ति, यत्तु सूत्रे त्रिभिः शतैरित्युक्तं तत्र केवलाः स्त्रियः पुरुषा वा गृहीताः द्वितीयः पक्षः पुनः सन्नपि न विवक्षित इति सम्प्रदायः, स्थानाङ्गटीकायामप्युक्तं 'मल्लिजिनः स्त्रीशतैरपि त्रिभि' रिति, तथा वासुपूज्यो जिनः षड्भिः पुरुषशतैः[600] सह व्रतं प्रपन्नः, शेषास्तु ऋषभवीरमल्लिपार्श्ववासुपूज्यव्यतिरिक्ता अजितादय एकोनविंशतिर्जिनाः सहस्रसंयुता[1000] एकपुरुषसहस्रसहिताः प्राव्राजिषुरिति गाथार्थः ॥३५॥

साम्प्रतं ये यत्र स्थाने प्रव्रजितास्तत् प्रतिपादयन्नाह—

**उसहो विणीयनयरीं बारवइए य नेमिजिणचंदो ।**
**सेसा पुण तित्थयरा पवइया जम्मभूमीसुं ॥ ३६ ॥**

व्याख्या—ऋषभः—प्रथमजिनः विनीतानगर्यां, अरिष्टनेमिजिनचन्द्रश्च द्वारावत्यां प्रव्रजितः, शेषाः पुनरजितादयो द्वाविंशतिस्तीर्थंकराः स्वस्वजन्मभूमीषु व्रतं भेजुरिति गाथार्थः, गतं द्वादशं दीक्षास्थानम् ॥ ३६ ॥

इदानीं 'तव' त्ति त्रयोदशं स्थानं व्याख्यातुकाम आह—

**वसुपुज्जो चउत्थेणं अट्ठमभत्तेण मल्लिपासा य।**
**सेसजिणा छट्ठेणं सुमइजिणो निच्चभत्तेणं ॥ ३७ ॥**

व्याख्या—वासुपूज्यश्चतुर्थेनैकोपवासेन, मल्लिः पार्श्वश्चाऽष्टम-भक्तेन त्रिभिरुपवासैः, सुमतिजिनो नित्यभक्तेन—अनवरतभक्तेन तपसा प्रव्रजितः, शेषाः पुन ऋषभस्वामिप्रभृतयो विंशतिः तीथकरा षष्ठेन द्वाभ्यामुपवासाभ्यामिति गाथार्थः ॥ ३७ ॥

इदानीं 'भिक्ख' त्ति चतुर्दशं स्थानं प्रचिकटयिषुराह—

**संवच्छरेण उसभस्स पारणं सेसयाण बीयदिणे।**
**परमन्नं तेवीसं इक्खुरसो पढमपारणए ॥ ३८ ॥**

व्याख्या--ऋषभस्य प्रथमतीर्थकृतः संवत्सरेण—वर्षेण, शेषाणा-मजितादीनां जैनानां प्रव्रज्याग्रहणदिनाद् द्वितीये दिवसे पारण-कमभूत्। तत्रापि अजितप्रभृतित्रयोविंशतितीर्थकृतां प्रथमपारणके परमान्नं पायसलक्षणमासीत् ऋषभजिनेशितुः प्रथमपारणके इक्षुरसः समायासीदिति गाथार्थः ॥ ३८ ॥

साम्प्रतं यैस्तीर्थकृतां पारणकानि कारित्तानि तेषां नामान्याह—

सिज्जंस १ बंभदत्ते २

सुरिंददत्ते ३ य इंददत्ते ४ य।

पउमे य ५ सोमदेवे ६

महिंद ७ तह सोमदत्ते ८ य ॥ ३९ ॥

पुस्स ९ पुणव्वसू १० पुण

नंद ११ सुनंदे १२ जए १३ य विजए १४ य।

तत्तो य धम्मसीहे १५

सुमित्त १६ तह वग्घसीहे १७ य ॥ ४० ॥

अवराइय १८ विस्ससेणे १९

वीसइमे होइ बंभदत्ते २० य।

दिन्ने २१ वरदिन्न २२ पुण

धन्ने २३ बहुले २४ य बोधव्वे ॥ ४१ ॥

व्याख्या—'सिज्जस' इत्यादि, तत्र ऋषभस्य पारणाकारकः श्रेयांसकुमारः १, एवं क्रमेणाऽजितादिजिनानां—ब्रह्मदत्तः २, सुरेन्द्रदत्तः ३, इन्द्रदत्तः ४, पद्मः ५, सोमदेवः ६, महेन्द्रः ७, सोमदत्तः ८, पुष्यः ९, पुनर्वसू १०, पुनः नन्दः ११, सुनन्दः १२, जयः १३, विजयः १४, ततो धर्मसिंहः १५,

सुमित्रः १६, तथा व्याघ्रसिंहश्च १७, अपराजितः १८, विश्वसेनः १९, विंशतितमो ब्रह्मदत्तः २०, दिन्नः २१, वरदिन्नः २२, पुनर्धन्यः २३, बहुलतापसश्चेति पारणकारका बोद्धव्या इतिगाथात्रयार्थः ॥ ३९ । ४० । ४१ ॥

इदानीं 'नाणट्ठाणं' ति पञ्चदशस्थानमभिधित्सुराह—

**उसभस्स पुरिमताले वीरस्सुजुवालियानईतीरे ।**
**पवज्जाठाणेसुं सेसाण जिणाण नाणाइं ॥ ४२ ॥**

व्याख्या—ऋषभस्य प्रथमजिनस्य विनीतानगर्या उद्यान-स्थाने पुरिमतालनगरे केवलज्ञानमुत्पन्नं, वीरस्य चरमतीर्थपते-र्जृम्भिकाग्रामाद्बहिः ऋजुवालुकानद्यास्तीरे, शेषाणां द्वाविंशतेर्जिनानां प्रव्रज्यास्थानेष्वेवेति गाथार्थः ॥ ४२ ॥

साम्प्रतं यस्य प्रभोर्येन तपसा केवलज्ञानमुत्पन्नं तत्तपः प्रतिपादयन्नाह—

**अट्ठमभत्तवसाणे पासोसहमल्लिरिट्ठनेमीणं**
**वसुपुज्ज चउत्थेणं सेसाणं छट्ठभत्तेणं ॥ ४३ ॥**

व्याख्या—श्रीपार्श्वजिनवृषभस्वामिमल्लिनाथाऽरिष्टनेमीनामष्टम-भक्तावसाने—उपवासत्रितयान्ते केवलज्ञानमुत्पेदे, वासुपूज्यस्य चतु-

र्थेन–एकोपवासेन, शेषाणामजितजिनप्रभृतीनामेकोनविंशतेस्तीर्थकृतां तु षष्ठभक्तेन द्वाभ्यामुपवासाभ्यामितिगाथार्थः ॥ ४३ ॥

अथ तीर्थकृतां चैत्यवृक्षनामान्याह—

नग्गोह १ सत्तवण्णे २
साले ३ पियए ४ पियंगु ५ छत्ताभे ६ ।
सिरिसे ७ य नागरुक्खे ८
मल्ली ९ य पियंगुरुक्खे १० य ॥ ४४ ॥

तिंदुग ११ पाडल १२ जंबू १३
आसत्थे १४ खलु तहेव दहिवण्णे १५ ।
नंदीरुक्खे १६ तिलए १७
चंपगरुक्खे १८ असोए १९ य ॥ ४५ ॥

चंपग २० बउले २१ य तहा
वेडसरुक्खे २२ तहेव धवरुक्खे २३
साले २४ चउवीसइमे
चेइयरुक्खा जिणवराणं ॥ ४६ ॥

१ क्षये जिना घातिचतुष्टयस्य सत्केवलज्ञानमवाप्नुवन्ति ।
अधस्तरोर्यस्य स चैत्यवृक्षनाम्ना प्रसिद्धो जिनशासनेऽत्र ॥

व्याख्या—'नग्गेह' त्ति, तत्र श्रीऋषभस्य चैत्यवृक्षः-ज्ञानोत्पत्तितरुर्न्यग्रोधः १, एवमजितादिशेषजिनानां क्रमेण सप्तपर्णः २, शालः ३, प्रियकः[1] ४, प्रियंगु ५, छत्राभः ६, सिरीषः ७, नागवृक्षः ८, मल्लिका ९, प्रियंगुः[2] १०, तिन्दुकः, ११ पाडलः १२, जम्बूः १३, अश्वत्थः १४, दधिपणः १५, नन्दीवृक्षः १६, तिलकः १७, चम्पकवृक्षः[3] १८, अशोकः १९, चम्पकः २०, बकुलः २१, वेतसवृक्षः २२, धववृक्षः २३, चतुर्विंशः शालः २४, इत्येते चैत्यवृक्षाः-केवलज्ञानोत्पत्तितरवोऽवगन्तव्याः। इति गाथात्रयार्थः ॥ ४४ । ४५ । ४६ ॥

इदानीं 'गणहर' त्ति षोडशस्थानव्याचिख्यासयाऽऽह—

**चुलसीइ १ पंचनवई २**
**बिसुत्तरं ३ सोलसुत्तरं ४ च सयं ५।**
**सत्तुत्तर ६ पणनवई ७**
**तेणउई ८ अट्ठसीई ९ य ॥ ४७ ॥**

**इक्कासी १० बावत्तरी ११**
**छावट्ठी १२ सत्तवण्ण १३ पण्णा १४ य।**

---

१ प्रियाल इत्यन्ये, २ पिलङ्खुरिति केचित् ३ आम्र इत्यपरे।

तेयालीसा १५ य तहा

छत्तीसा १६ चेव पणतीसा १७ ॥ ४८ ॥

तित्तीस १८ अट्ठवीसा १९

अट्ठारस २० तहय चेव सत्तरस २१ ।

अट्ठारस २२ दस २३ इक्का-

रसेव २४ इय गणहरप्पमाणं ॥ ४९ ॥

व्याख्या—' चुलसी ' इत्यादि, श्रीऋषभस्वामिनः ऋषभसेनाद्याश्चतुरशीतिर्गणधराः १, श्रीअजितजिनस्य सिंहसेनप्रभृतयः पञ्चनवतिः २, श्रीसम्भवस्य वारमुख्या द्व्यधिकं शतम् ३, श्रीअभिनन्दस्य वज्रनाभाद्याः षोडशोत्तरं शतम् ४, श्रीसुमतिजिनस्य चमरादयः शतं ५ श्रीपद्मप्रभस्य सुव्रतादयः सप्ताधिकं शतम् ६, श्रीसुपार्श्वनाथस्य विदर्भाद्याः पञ्चनवतिः ७, श्रीचन्द्रप्रभस्य दत्तादयस्त्रिनवतिः ८, श्रीसुविधिस्वामिनोऽष्टाशीतिर्वराहप्रभृतयः ९, श्रीशीतलजिनस्यैकाशीतिरानन्दाद्याः १०, गोशुभाद्याः षट्सप्ततिः श्रेयांसस्य ११, श्रीवासपूज्यस्य षट्षष्टिः सूक्ष्मप्रभृतयः १२, श्रीविमलस्य सप्तपञ्चाशन्मन्दराद्याः १३, यशोमुख्याः पञ्चाशदनन्तस्य १४, श्रीधमनाथस्याऽरिष्टाद्यास्त्रिचत्वारिंशत् १५, श्रीशान्तिनाथस्य चक्रायुधादयः षट्त्रिंशत् १६, श्रीकुन्थोः स्वयम्प्रभप्रमुखाः पञ्चत्रिंशत्

१७, श्रीअरजिनस्य कुम्भप्रभृतयस्त्रयस्त्रिंशत् १८, श्रीमल्लिस्वामिनो भिषक्प्रभृतयोऽष्टाविंशतिः १९, श्रीमुनिसुव्रतस्येन्द्रादयोऽष्टादश २०, श्रीनमेः कुम्भाद्याः सप्तदश २१, श्रीअरिष्टनेमिनो वरदत्ताद्या अष्टादश, एकादशेत्यन्ये २२, श्रीपार्श्वप्रभोरार्यदत्तादयो दश २३, श्रीवर्द्धमानजिनेशितुरिन्द्रभूतिप्रभृतय एकादश २४, एतत् ऋषभादीनां चतुर्विंशतेस्तीर्थकृतां यथाक्रमं गणधराणां—मूलसूत्र-कर्तॄणां प्रमाणं विज्ञेयमिति गाथात्रयार्थः ॥ ४७ । ४८ । ४९ ॥

इदानीं 'मुणि' त्ति सप्तदशं स्थानं प्रचिकटयिषुराह—

चुलसीइ सहस्साइं १
　　इगलक्ख २ दुलक्ख ३ तिन्नि ४ लक्खाइं ।
वीसहिया ५ तीसहिया ६
　　तिन्नि ७ य अड्ढाइ ८ य दु ९ इक्कं १० ॥५०॥

चउरासीइ सहस्सा ११
　　बिसत्तरी १२ अट्ठसट्ठि १३ छावट्ठी १४ ।
चउसट्ठी १५ बासट्ठी १६
　　सट्ठी १७ पन्नास १८ चालीसा १९ ॥ ५१ ॥

**तीसा २० वीसा २१ अट्ठा-**
**रसेव २२ सोलस २३ चउद्दस २४ क्रमेणं ।**
**एयं साहुपमाणं इत्तो अज्जाण वुच्छामि ॥ ९२ ॥**

व्याख्या—'चुलसीई' इत्यादि, तत्र श्रीऋषभस्वामिनश्चतुरशीतिः सहस्राः साधवः १, अजितस्यैकं लक्षं २, सम्भवस्य द्वे लक्षे ३, अभिनन्दनस्य त्रीणि लक्षाणि ४, सुमतिजिनस्य विंशत्या सहस्रैः समन्विता त्रिलक्षी ५, पद्मप्रभस्य त्रिंशत्सहस्रयुक्तानि त्रीणि लक्षाणि ६, सुपार्श्वस्य त्रीणि लक्षाणि ७, चन्द्रप्रभस्य सार्द्धे लक्षे द्वे ८, सुविधिस्वामिनो द्वे लक्षे ९, श्रीशीतलस्यैकं लक्षं १०, श्रेयांसस्य चतुरशीतिः सहस्राः ११, श्रीवासुपूज्यस्य द्वासप्ततिः सहस्राणि १२, विमलस्याऽष्टषष्टिसहस्राणि १३, अनन्तस्य षट्षष्टिः सहस्राणि १४, धर्मजिनस्य चतुःषष्टिः सहस्राणि १५, श्रीशान्तिनाथस्य द्विषष्टिः सहस्राणि १६, कुन्थुजिनस्य षष्टिसहस्री १७, अरस्वामिनः पञ्चाशत्सहस्राणि १८, मल्लिजिनस्य चत्वारिंशत्सहस्राः १९, मुनिसुव्रतस्य त्रिंशत्सहस्राः २०, नमेर्विंशतिसहस्राणि २१, अरिष्टनेमिनोऽष्टादशसहस्राणि २२, पार्श्वप्रभोः षोडशसहस्राणि २३, श्रीवर्द्धमानस्वामिनश्चतुर्दशसहस्राणीति ऋषभादिवर्द्धमानान्तानां चतुर्विंशतेस्तीर्थकृतां क्रमेण साधुप्रमाणं विनिर्दिष्टं, एतेषां

सर्वाग्रेणाऽष्टाशीतिलक्षाणि अष्टचत्वारिंशत्सहस्राधिकानि भवन्ति,
२८४८०००
§उक्तं च— अट्ठावीसं लक्खा अडयालीसं च तह सहस्साइं।
सव्वेसिं पि जिणाणं जईण माणं विनिद्दिट्ठं ॥

एतच्च श्रीमज्जिनेन्द्रकरकमलदीक्षितानामेवैकत्र पिण्डितानां मुनीनां प्रमाणं, न पुनर्गणधरादिभिरपि दीक्षितानां, तेषामतिबहुत्वात्, इतोऽग्रेतनद्वारे आर्यिकाणां साध्वीनां सङ्ख्यापरिमाणं वक्ष्यामि कथयिष्ये इति गाथात्रयार्थः ॥ ५० । ५१ । ५२ ॥

इदानीं 'अज्जिय' त्ति अष्टादशस्थानव्याचिख्यासयाऽऽह—

**तिण्णेव १ तिण्णि तीसा २**
**छत्तीसा तिण्णि ३ छच्च तीसहिया ४।**
**पंच य तीसा ५ चउरो**
**वीसा ६ चउरो य तीसहिया ७ ॥ ५३ ॥**
**तिण्णि य लक्खासीया ८**
**वीसइ लक्खो ९ छउत्तरो लक्खो १०।**
**लक्खो तिण्णि सहस्सा ११**
**लक्खो १२ लक्खो य अट्ठसया १३ ॥ ५४ ॥**

---

§ प्रवचनसारोद्धारसप्ततिशतस्थानप्रकरणटीकयोः श्रीसुमतिपद्मप्रभजिनयोः

**बासट्ठी सहस्स १४ चउसयाइं १५**
**इगसट्ठी सहस्स छच्च सया १६ ।**
**सट्ठी छच्चेव सया १७**
**सट्ठी १८ पणपण्ण १९ पण्णासा २० ॥५५॥**

**इगुयाला २१ चालीसा २२**
**अट्ठत्तीसा २३ तहव छत्तिसा २४ ।**
**अज्जाणं तु सहस्सा नायव्वा निउणबुद्धीए ॥ ५६ ॥**

---

श्रमणसङ्ख्यामाश्रित्य विंशत्यधिकानि त्रीणि लक्षाणि ५, त्रिंशदधिकानि त्रीणि लक्षाणि ६, इति व्याख्यातं दृश्यते परं तत्र सर्वेषां जिनानामष्टाविंशतिर्लक्षाणि अष्टचत्वारिंशत्सहस्राधिकानि ( २८४८००० ) इत्येतत्प्रमाणा मुनिसङ्ख्या न सङ्गतिमङ्गति, केवलं विंशत्यधिकास्त्रिंशदधिकास्तिस्रो लक्षा इत्येवं प्रतिपादने ४९९५० एतत्प्रमाणा मुनिसङ्ख्यायास्त्रुटिभवनात्, श्रीमलयगिरिसूरिवर्यैरावश्यकवृत्तौ "**चुलसीइं च सहस्सा १ एगं २ दुवे ३ य तिन्नि ४ लक्खाइं । तिन्नि य वीसहिआइं ५ तीसहिआइं तिन्नेव ६ ।**" इत्येतद्गाथाव्याख्यायां सुमतेस्त्रीणि लक्षाणि विंशतिसहस्राणि ५ । पद्मप्रभस्य त्रीणि लक्षाणि त्रिंशत्सहस्राधिकानि'' इत्युक्तत्वात् त्रिषष्टिशलाकापुरुषचरित्रपद्मानन्दमहाकाव्यादिष्वप्येवमेव प्रतिपादितत्वाच्च सुमतिपद्मप्रभयोर्मुनिसंख्या विंशतिसहस्राधिकानि त्रिंशत्सहस्राधिकानि च त्रीणि लक्षाणीत्येष एव समीचीनः पन्थाः प्रतिभाति, तत्त्वं पुनस्तत्त्वविदो विदन्ति ॥

व्याख्या—' तिण्णेव ' त्ति, ऋषभप्रभोरार्यिकाणां लक्ष[३]त्रयमेव १, अजितस्य त्रीणि[३] लक्षाणि त्रिंशत्[३०]सहस्राणि च २, सम्भवस्य तिस्रो[३] लक्षाः षट्त्रिंशत्[३६]सहस्राः ३, अभिनन्दस्य त्रिंशत्[३०]सहस्राधिकाः षट्[६] लक्षाः ४, सुमतेः पञ्च[५] लक्षाणि त्रिंशत्[३०]सहस्राणि च ५, पद्मप्रभस्य चतस्रो[४] लक्षा विंशति[२०]सहस्राणि ६, सुपार्श्वस्य चतस्रो लक्षास्त्रिंशत्[३०]सहस्राधिकाः ७, चन्द्रप्रभस्य त्रीणि[३] लक्षाण्यशीतिः[८०] सहस्राणि च ८, सुविधिस्वामिनो लक्षमेकं[१] विंशति[२०]सहस्राधिकं ९, शीतलजिनस्य षडुत्तरं[६]—साध्वीषट्काऽधिकं लक्षमेकं[१] १०, श्रेयांसस्य लक्षमेकं[१] त्रीणि[३] सहस्राणि च ११, वासुपूज्यस्य लक्षमेकं[१] १२, विमलस्यैकं[१] लक्षमष्ट[८]शतानि च १३, अनन्तजितो द्विषष्टि[६२]सहस्राणि १४, धर्मजिनस्य द्विषष्टि[६२]सहस्राणि चतुः[४]शतानि १५, श्रीशान्तिजिनस्यैकषष्टि[६१]सहस्राणि षट्[६] शतानि च १६, कुन्थोः षष्टि[६०]सहस्राणि षट्[६] शतानि च १७, श्रीअरजिनस्य षष्टि[६०]सहस्राणि १८, श्रीमल्लिस्वामिनः पञ्चपञ्चाशत्[५५]सहस्राणि १९, मुनिसुव्रतस्य पञ्चाशत्[५०]सहस्राणि २०, नमेरेकचत्वारिंशत्[४१]सहस्राणि २१, अरिष्टनेमिनश्चत्वारिंशत्[४०]सह-

स्राणि २२, श्रीपार्श्वप्रभोरष्टात्रिंशत्सहस्राणि २३, श्रीवर्द्धमानस्वामिनः षट्त्रिंशत्सहस्राणीति ऋषभप्रमुखानां तीर्थकृतामार्यिकाणां-प्रमाणं निपुणबुध्या ज्ञातव्यमिति, ५३।५४।५५।५६। गाथा-चतुष्टयार्थः॥ आसां सर्वसङ्ख्यामीलने चतुश्चत्वारिंशल्लक्षाः षट्चत्वारिंशत्सहस्रैश्चतुःशतैरभ्यधिका उपरि आर्यिकाषट्कं चेति भवन्ति, तथा चोक्तम्—

"चोयालीसं लक्खा छायालसहस्स चउसयसमग्गा ।
छच्चेव अज्जियाओ चउवीसाए जिणवराणं ॥ १ ॥"

इदानीं 'जक्ख' त्ति एकोनविंशस्थानव्याचिकीर्षुराह—

**जक्खा गोमुह १ महजक्ख २**
**तिमुह ३ ईसर ४ तुंबुरू ५ कुसुमो ६ ।**
**मायंगो ७ विजया ८ जिय ९**
**बंभो १० मणुओ ११ सुरकुमारो १२ ॥५७॥**
**छम्मुह १३ पयाल १४ किन्नर १५**
**गरुडो १६ गंधव १७ तहय जक्खिदो १८ ।**
**कूबर १९ वरुणो २० भिउडी २१**
**गोमेहो २२ वामण २३ मयंगो २४ ॥५८॥**

व्याख्या–'जक्खा' त्ति, यक्षा भक्तिदक्षास्तीर्थकृतामिमे, यथा ऋषभस्वामिनो गोमुखो यक्षः कनकद्युतिर्गजवाहनैश्चतुर्भुजो वरदाक्षस्रग्भागदक्षिणपाणिद्वयो मातुलिङ्गपाशभूषितवामकरद्वयश्च १, अजितस्य महायक्षाऽभिधो यक्षः श्यामशरीरः करिवरारूढश्चतुर्मुखोऽष्टबाहुः शक्त्यङ्कुशबीजपूराऽभयदभृद्वामकरचतुष्टयः पाशाऽक्षसूत्रमुद्गरवरदाऽङ्कितदक्षिणपाणिचतुष्कश्च २, सम्भवजिनस्य त्रिमुखो नामा यक्षस्त्रिमुखस्त्रिनेत्रै: श्यामरुचिर्बर्हणवाहनः षड्भुजो बभ्रुगदाऽभयदमण्डितदक्षिणपाणित्रयो मातुलिङ्गनागाऽक्षसूत्रसंयुतवामभुजत्रयश्च ३, श्रीअभिनन्दनस्येश्वराख्यो यक्षेश्वराभिधो वा यक्षः श्यामकान्तिर्गजवाहनश्चतुर्भुजो मातुलिङ्गाऽक्षसूत्रयुक्तदक्षिणपाणिद्वयो नकुलाऽङ्कुशकलितवामदोर्युगश्च ४, श्रीसुमतिजिनस्य तुम्बुरुर्यक्षस्तार्क्ष्यवाहनः सितद्युतिश्चतुर्बाहुर्वरदशक्तियुक्तदक्षिणपाणिद्वयो गदापाशभासितवामकरद्वयश्च ५, श्रीपद्मप्रभस्य कुसुमाख्यो यक्षो नीलच्छविर्मृगवाहनश्चतुर्हस्तः फलाऽभयप्रदाऽलङ्कृतदक्षिणपाणिद्वयो नकुलाऽक्षसूत्राऽऽश्रितवामकरयुगश्च ६, श्रीसुपार्श्वजिनस्य मातङ्गो यक्षो विनीलवर्णः करीन्द्रवाहनश्चतुर्भुजः बिल्वपाशशालिदक्षिणपाणिद्वयो नकुलाङ्कुशशोभितवामकरद्वयश्च ७, श्रीचंद्रप्रभस्य विजयो यक्षो नीलाङ्गो हंसवाहनस्त्रिलोचनो

---

१ मतांतरे–वृषवाहनः २ नवाक्षः। ३ तुरंग. ४ वज्रा०

द्विबाहुः चक्रयुतदक्षिणकरो मुद्गरभृद्वामपाणिश्च ८, श्रीसुविधेरजितो यक्षः श्वेताङ्गः कुर्मवाहनश्चतुर्भुजो मातुलिङ्गाऽक्षमालामालिदक्षिणपाणिद्वयो नकुलकुन्ताऽङ्कितवामकरद्वयश्च ९, श्रीशीतलस्य ब्रह्मा यक्षस्त्र्यक्षश्चतुर्मुखः श्वेततनुः पद्मासनासीनश्चतुर्भुजो मातुलिङ्गमुद्गरवरेण्यदक्षिणपाणिद्वयः पाशाऽभयदभासमानवामकरद्वयश्च, मतान्तरे पुनरष्टपाणिर्मातुलिङ्गाऽभयपाशमुद्गरधारिदक्षिणहस्तचतुष्टयो नकुलगदाकमलाक्षसूत्राङ्कुशभृद्वामकरचतुष्कश्च १०, श्रेयांसजिनस्य मनुजो मतान्तरेऽणेश्वरो यक्षस्त्र्यक्षः श्वेतवर्णो वृषभाश्रयश्चतुर्बाहुर्मातुलिङ्गगदासुन्दरदक्षिणपाणिद्वयो नकुलाऽक्षमालिकाकलितवामकरद्वयश्च ११, श्रीवासुपूज्यस्य सुरकुमरो यक्षः स्वेताङ्गो हंसवाहनश्चतुर्भुजो मातुलिङ्गशराश्रितदक्षिणपाणिद्वयो नकुलधनुर्धरवामभुजद्वयश्च १२, श्रीविमलस्य षण्मुखो यक्षः द्वादशाक्षः शिखियानो वलक्षरुक् द्वादशभुजः फलचक्रेषुखड्गपाशाऽक्षसूत्रयुतदक्षिणपाणिषट्को नकुलचक्रधनुःफलकाऽङ्कुशाऽभयदविराजितवामकरषट्कश्च १३, अनन्तजितः पातालयक्षस्त्रिमुखःषडम्बकधरस्ताम्रतनुःकान्तिर्मकरवाहनः षड्भुजः पद्मखड्गपाशाङ्कितदक्षिणपाणित्रयो नकुलफलकाऽक्षमालिकाकमनीयवामभुजत्रयश्च १४, श्रीधर्मनाथस्य किन्नराऽभिधानो

---

१ मतान्तरेण–खड्ग २ रत्ना ३ द्वादशलोचनः ४ श्यामाङ्गः

यक्षस्त्रिमुखः षण्नयनः कुर्मरथो रक्तच्छविः षड्भुजो मातुलिङ्ग-गदाऽभयद्युतदक्षिणदोस्त्रयो नकुलाऽम्भोजाऽक्षमालाऽलङ्करिष्णुवाम-करत्रयश्च १५, श्रीशांतिनाथस्य गरुडाख्यो यक्षः क्रोडास्यः किरिवाहनः श्यामश्चतुर्भुजो बीजपूराम्बुजभ्राजमानदक्षिणपाणिद्वयो नकुलाऽक्षसूत्रयुक्तवामपाणियुगलश्च १६, श्रीकुन्थोर्गन्धर्वयक्षोऽ-सिताङ्गो हंसवाहनश्चतुर्बाहुर्वरदपाशकान्वितदक्षिणपाणिद्वयो मातु-लिङ्गाङ्कुशशालिवामकरद्वयश्च १७, श्रीअरजिनस्य यक्षेन्द्रो यक्षस्त्र्यक्षः[1] षण्मुखः श्यामाङ्गः शङ्खवाहनो द्वादशकरो मातुलिङ्गबाणा-सिमुद्गरपाशकाभययुक्तदक्षिणपाणिषट्को बभ्रधनुर्वर्मशूलाङ्कुशाऽक्ष-सूत्राञ्चितवामकरषट्कश्च १८, मल्लिस्वामिनः कूबरः कूबेराख्यो वा यक्ष-श्चतुर्मुखोऽष्टाक्षः[2] शक्रायुधसवर्णवर्णो दन्तिवाहनोऽष्टपाणिर्वरदपरश्वध-शूलाऽभयद्युतदक्षिणपाणिचतुष्टयो बीजपूरकशक्तिमुद्गराऽक्षसूत्राऽ-धिष्ठितवामहस्तचतुष्कश्च १९, श्रीमुनिसुव्रतस्य वरुणो यक्षस्त्रिनेत्रश्च-तुराननः श्वेताङ्गद्युतिर्वृषभवाहनो जटामुकुटभूषितोऽष्टबाहुर्मातुलि-ङ्गगदाबाणशक्तियुक्तदक्षिणपाणिचतुष्को नकुलाऽक्ष[3]सूत्रधनुःपरशु-समन्वितवामकरचतुष्टयश्च २०, नमिजिनेशितुर्भृकुट्याख्यो यक्षस्त्र्य-क्ष[4]श्चतुर्मुखः स्वर्णरुक् वृषासनोऽष्टबाहुर्मातुलिङ्गशक्तिमुद्गराऽभयद-

१ मतान्तरे अष्टादशलोचनः २ द्वादशलोचनः ३ पद्म० ४ द्वादशाक्षः ।

शोभितदक्षिणपाणिचतुष्टयो नकुलपरशुवज्राऽक्षसूत्रसमेतवामकरचतुष्कश्च २१, श्रीअरिष्टनेमिनो गोमेधो यक्षस्त्रिमुखः षण्नयणः श्यामाङ्गरुचिः पुरुषवाहनः षड्भुजः मातुलिङ्गपरश्वधचक्राङ्कितदक्षिणपाणित्रयो नकुलशूलशक्तियुक्तवामकरत्रयश्च २२, पार्श्वप्रभोर्वामनो मतान्तरेण पार्श्वाख्यो यक्षः कुञ्जरास्यः कुर्मासनोऽसितद्युतिमूर्ध्नि फणिफणच्छत्रश्चतुर्हस्तो मातुलिङ्गगदायुक्तदक्षिणपाणिद्वयो नकुलनागाधिष्ठितवामकरद्वयश्च २३, श्रीवर्द्धमानस्वामिनो मातङ्गो यक्षः करिवरारूढोऽसितकान्तिर्द्विभुजो नकुलकलितदक्षिणपाणिर्मातुलिङ्गसङ्गतवामहस्तश्चेति ॥ २४ ॥ गाथाद्वयार्थः ॥ ५७ । ५८ ॥

इदानीं ' देवीओ ' ति विंशं स्थानं विवरीतुमाह—

**देवीओ चक्केसरी १**
**अजिया २ दुरिआरि ३ कालि ४ महकाली ५ ।**
**सामा ६ संता ७ जाला ८**
**सुतारया ९ सोअ १० सिरिवच्छा ११ ॥५९॥**
**पवरा १२ विजयं १३ कूसा १४**
**पण्णत्ती १५ निवाणि १६ अच्चुआ १७ धरणी १८ ।**
**वइरुट्ट १९ छुत्त २० गंधारी २१**
**अंब २२ पउमावई २३ सिद्ध २४ ॥ ६० ॥**

व्याख्या—देवीओ इत्यादि, तत्र प्रथमतीर्थपतेश्चक्रेश्वरी शासनदेवता मतान्तरेणाऽप्रतिचक्रा सुवर्णसवर्णवर्णा सुपर्णवाहनाऽष्टभुजा चक्रपाशेषुवरदविराजितदक्षिणपाणिचतुष्टया चक्राऽङ्कुशधनुर्वज्रविभूषितवामहस्तचतुष्का १, श्रीअजितजिनस्याऽजितबलाऽजिता वा देवता कनक[1]द्युतिर्लोहासने[2]समासीना चतुर्बाहुर्वरदपाशशालिदक्षिणकरद्वया बीजपूराङ्कुशोद्भासितवामहस्तद्वितया च २, श्रीसम्भवस्वामिनो दुरितारिका देवी गौराङ्गी छगलवाहना चतुर्भुजा वरदाऽक्षसूत्रयुतदक्षिणदोर्युगा फलाऽभयभृद्वामकरद्वया च ३, श्रीअभिनन्दनस्य काली देवता श्यामशरीरा कमलवाहना चतुर्हस्ता वरदपाशाङ्कितदक्षिणपाणिद्वया नागाङ्कुशाधिष्ठितवामकरद्वया च ४, श्रीसुमतिनाथस्य महाकाली शासनदेवता कनककान्तिरम्भोरुहासना चतुर्बाहुर्वरदपाशभूषितदक्षिणकरद्वया मातुलिङ्गाऽङ्कुशयुक्तवामपाणिद्वया च ५, पद्मप्रभस्य श्यामा मतान्तरेणाऽच्युता श्यामाङ्गा नरवाहना चतुर्भुजा वरदपाश[3]शोभितदक्षिणपाणिद्वया कोदण्डाऽभयमण्डितवामहस्तद्वया च ६, श्रीसुपार्श्वस्य शान्ता देवी सुवर्णवर्णा करीन्द्रवाहना चतुर्भुजा वरदाक्षसूत्रयुक्तदक्षिणपाणिद्वया शूलाऽभय-

१ मतान्तरेण—धवलरुक्. २ गोगामिनी. ३ बाण० ४ मातुलिङ्गाङ्कुशयुग्वामहस्तद्वया च.

भृद्धामबाहुद्वया च ७, श्रीचन्द्रप्रभस्य ज्वाला मतान्तरेण भृकुटिर्देवता सुवर्णवर्णा हंसवाहना चतुर्हस्ता खड्गमुद्गरयुतदक्षिणदोर्द्वया फलकपरश्वधशालिवामकरद्वया च ८, श्रीसुविधिस्वामिनः सुतारा देवी गौराङ्गी वृषभवाहना चतुर्भुजा वरदाक्षसूत्रभषितदक्षिणपाणिद्वया कलशाऽङ्कुशकलितवामकरद्वया च ९, श्रीशीतलजिनस्याऽशोका देवी मुद्गाभा कमलवाहना चतुर्भुजा वरदपाशभासितदक्षिणपाणिद्वया फलाङ्कुशभूषितवामकरद्वया च १०, श्रीश्रेयांसस्य श्रीवत्सा मतान्तरेण मानवी देवी गौरशरीरा सिंहवाहना चतुर्भुजा वरदमुद्गरोद्यतदक्षिणपाणिद्वया कलशाङ्कुशप्रशस्यवामकरद्वया च ११, श्रीवासुपूज्यस्य प्रवरा मतान्तरेण चण्डा देवी श्यामधामदेहा वाहवाहना चतुर्भुजा वरदशक्तियुक्तदक्षिणपाणिद्वया पुष्पगदाधृतवामहस्तयुगला च १२, श्रीविमलस्वामिनो विजया मतान्तरेण विदिता देवी स्वर्णाभा कमलवाहना चतुर्भुजा बाणपाशाश्रितदक्षिणपाणिद्वया धनुर्नागसङ्गतवामकरद्वया च १३, श्रीअनन्तजितोऽङ्कुशा देवी गौरशरीरा कमलासना द्विभुजा फलककलितदक्षिणपाणिः अङ्कुशाङ्कितवामहस्ता च, मतान्तरेण चतुर्भुजा पाशासिलक्षि-

---

१ बिडालवाहना, वरालकाख्यजीवविशेषविहारा वा. २ फलका० ३ पाश ।

तदक्षिणपाणियुग्मा फलकाऽङ्कुशभृद्वामहस्तद्वितया च १४, श्री-धर्मजिनस्य प्रज्ञप्तिमतान्तरेण पन्नगा कन्दर्पाख्या वा देवी गौराङ्गी मीनवाहना चतुर्भुजा कमलाङ्कुशोद्भासमानदक्षिणपाणिद्वया पद्माऽभयदभृद्वामकरद्वया च १५, श्रीशान्तिनाथस्य निर्वाणी देवी गौराङ्गी[1] स्मेरपङ्कजवाहना चतुर्बाहुः पुस्तक[2]ोत्पलमालिदक्षिणपाणिद्वया कमण्डलुकमलाऽलङ्कृतवामकरद्वया च १६, श्रीकुन्थुजिनेशितुरच्युता मतान्तरेण बलाख्या शासनदेवता गौर[3]शरीरा बर्हिणवाहना चतुर्भुजा बीजपूरकशूलशालिदक्षिणपाणिद्वया मुषुण्डीकमलकमनीयवामकरद्वया च १७, श्रीअरनाथस्य धारिणी देवी निलाङ्गी नलिनासना चतुर्भुजा मातुलिङ्गोत्पलकलितदक्षिणपाणिद्वया पद्माक्षसूत्रभृद्वामभुजद्वया च १८ श्रीमल्लिस्वामिनो वैरोट्या देवी कृष्णवर्णा कमलासना चतुर्भुजा वरदाक्षसूत्रभृद्दक्षिणपाणिद्वया मातुलिङ्गशक्तियुक्तवामकरद्वया च १९, श्रीमुनिसुव्रतस्याऽच्छुप्ता मतान्तरेण नरदत्ता देवता गौराङ्गी[4] भद्रासनासीना चतुःपाणिर्वरदाक्षसूत्रसमन्वितदक्षिणपाणिद्वया मातुलिङ्गशूलशालिवामकरद्वया च २०, श्रीनमिजिनस्य गान्धारी देवी श्वेततनुर्हंसवाहना चतुर्भुजा वरदखड्गयुक्तदक्षिणपाणिद्वया बीजपूरशकुन्तकलितवामकरद्वया च २१, श्रीअरिष्टनेमिनोऽम्बिका देवी सुवर्ण-

---

१ कनकरुचिः २ आचारदिनकरे त्वन्यथा. ३ कनकद्युतिः ४ कनकरुक्

वर्णा सिंहवाहना चतुर्भुजा आम्रलुम्बीपाशाऽऽलम्बिदक्षिणदोर्द्वया पुत्राङ्कुशासक्तवामदोर्द्वया च २२, श्रीपार्श्वप्रभोः पद्मावती शासनदेवता स्वर्णाभा कुर्कुटोरगवाहना चतुर्भुजा पद्मपाशावभासिदक्षिणपाणिद्वया फलाङ्कुशाङ्कितवामभुजद्वया च २३, श्रीमद्वर्द्धमानस्वामिनः सिद्धायिका शासनाऽधिष्ठात्री देवता हरिच्छविर्गजवाहना चतुर्भुजा पुस्तकाऽभययुक्तदक्षिणपाणिद्वया बीजपूरकवल्लिकाविराजितवामहस्तद्वया चेति २४, अत्र च प्रकरणकारेण यक्षाणां देवीनां च केवलानि नामान्येवाऽभिहितानि न पुनर्नयनवदनवर्णादिस्वरूपं निरूपितं अस्माभिस्तु बहूपयोगित्वात् ग्रन्थान्तरानुसारेण किञ्चित्तदीयमुखवर्णवाहनभुजप्रहरणादिस्वरूपं निरूपितमिति ॥ ५९ । ६० ॥

इदानीं ' सिद्धिट्ठाणं 'ति एकविंशं स्थानं बिभणिषुराह—

**अट्ठावयंमि उसभो वीरो पावाइ चंप वसुपुज्जो ।**
**उज्जितम्मि उ नेमी सम्मए सेसया सिद्धा ॥ ६१ ॥**

व्याख्या—अट्ठेत्यादि, श्रीऋषभस्वामी अष्टापदपर्वते, श्रीवीरजिनोऽपापायां पुर्यां, वासुपूज्यश्चम्पायां, 'तुः' पुनरर्थे, नेमी जिन उज्जितगिरौ सिद्धिसौधमध्यारुरोह, शेषाः पुनरजितादयो विंश-

१ सिंहवाहना २ पाशांभोरुहरुद्धवामकरद्वया ।

तिस्तीर्थकृतः सम्मेतशैलशिखरे सिद्धाः परमानन्दपदं प्राप्ता इति गाथार्थः ॥ ६१ ॥

साम्प्रतं यस्य येन तपसा सिद्धिस्तद्दर्शयन्नाह—

**निव्वाणं संपत्तो चउदसभत्तेण पढमजिणचंदो ।**
**सेसा उ मासिएणं वीरजिणिंदो य छट्ठेणं ॥ ६२ ॥**

व्याख्या—निव्वाणं ति, प्रथमजिनचन्द्र ऋषभश्चतुर्दशभक्तेनोपवासषट्केन निर्वाणं परमानन्दपदं संप्राप्तः, शेषा अजिताद्याः पार्श्वपर्यन्ता द्वाविंशतिर्जिना मासिकेन त्रिंशतोपवासैः, वीरजिनेन्द्रश्च षष्ठेनोपवासद्वयेनेति गाथार्थः ॥ ६२ ॥

इदानीं ये यावता परिवारेण सिद्धास्तज्ज्ञापयितुमाह—

**एगागी वीरजिणो तित्तीसमुणीहि संजुओ पासो ।**
**पंचहि सएहिं छत्तीसएहिं नेमी गओ सिद्धिं ॥ ६३ ॥**
**मल्लिसुपासा पंचहिं सएहिं छहिं वासुपुज्जजिणचंदो ।**
**अट्ठहिं सएहिं धम्मो तिउत्तरेहिं च पउमाभो ॥ ६४ ॥**
**नवहि सएहिं संती छहिं सहस्सेहिं परिव्वुडो विमलो ।**
**उसह दस सत्तणंतो सेसा उ सहस्सपरिवारा ॥ ६५ ॥**

व्याख्या—एगागीत्यादि, तत्रैकाकी अद्वितीयः श्रीवीरजिनः सिद्धिं गतः, त्रयस्त्रिंशता साधुभिः सह पार्श्वप्रभुः शिवं भेजे, षट्त्रिंशदधिकैः पञ्चभिः शतैः सह नेमिजिनः सिद्धिं गतः, श्रीमल्लिस्वामी सुपार्श्वजिनश्च पञ्चभिः श्रमणशतैः समं शिवं भेजे, पञ्चभिः शतैः श्रीवासुपूज्यजिनचन्द्रः सिद्धः, श्रीधर्मजिनोऽष्टभिः शतैः साकं परिनिर्वृत्तः, पद्मप्रभस्त्र्युत्तरैरष्टभिः शतैः सिद्धिसौधमध्यारुरोह, श्रीशान्तिजिनस्तु नवभिः श्रमणशतैः समं मुक्तिमगात्, षड्भिः सहस्रैः परिवृतो विमलो निर्वृतिमियर्त्ति स्म, तथा ऋषभः प्रथमतीर्थकृत् दशभिः सहस्रैः श्रेयःश्रियमशिश्रयत्, अनन्तजिज्जिनः सप्तभिः सहस्रैर्युतः परमानन्दपदं प्रपेदे, शेषाः पुनरजितसंभवाऽभिनन्दनसुमतिचन्द्रप्रभसुविधिशीतलश्रेयांसकुन्थुनाथाऽरनाथमुनिसुव्र-

---

१ अत्र चाऽऽवश्यकटिप्पनकाराः "अट्ठसएणं धम्मो' त्ति अष्टोत्तरशतेन साधूनां परिवृतः धर्मः सिद्ध इत्यर्थः, 'पउमाभे तिन्नि अट्ठसय' पद्मप्रभतीर्थकृद्विषये त्रीण्यष्टोत्तरशतानि साधूनां निवृतानीत्यवगन्तव्यं, त्रिगुणमष्टोत्तरशतमित्यर्थः, त्रीणि शतानि चतुर्विंशत्यधिकानीति यावत्" इति व्याख्यानयन्ति, प्रवचनसारोद्धारबृहद्वृत्तिकर्त्तारोऽप्येवमेव, सप्ततिशतस्थानवृत्तिनिर्मातृमतेन धर्मजिनस्याऽष्टाधिकशतेन, पद्मप्रभस्याऽष्टाधिकैस्त्रिभिः शतैर्मोक्ष इति भेदो दृश्यते, अस्माभिस्तु पद्मानन्दकाव्याद्यभिप्रायेणैतत्प्रकरणप्रणेत्रभिप्रायं प्रमाणीकृत्यैवं व्याख्यातमस्ति, विरुद्धं चेत्संशोधनीयं कृपया जैनसिद्धांतविशारदैर्विद्वद्भिरिति ॥

तनमिजिनलक्षणा द्वादश तीर्थकृतः प्रत्येकमेकैकसहस्रपरिवृताः सिद्धाः परिनिष्ठिताऽष्टकर्मभरा बभूवुरिति गाथात्रयार्थः॥ ६३।६४।६५॥

इदानीं शास्त्रसमाप्तिं चिकीर्षुरुपसंहरन्नाह—

**इय इक्कवीसठाणा उद्धरीय सिद्धसेणसूरीहिं।**
**चउवीसजिणवराणं असेससाहारणा भणिया॥ ६६॥**

व्याख्या—'इतिः' परिसमाप्तौ, श्रीऋषभादिचतुर्विंशतिजिनवराणामशेषसाधारणान्यमून्येकविंशतिस्थानानि समयसमुद्रादुद्धृत्य नतु स्वमनीषया श्रीसिद्धसेनसूरिभिर्भणितानि कथितानीति गाथार्थः॥ ६६॥

इति श्रीमत्तपागच्छगगनाङ्गणदिनमणिविद्वच्चूडामणिजैनाचार्यन्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वराऽपरनामश्रीमदात्मारामजीमहाराजशिष्यरत्नदक्षिणविहारिश्रीमदमरविजयमुनिपुङ्गवचरणारविन्दचञ्चरीकायमानचतुरविजयमुनिप्रणीता श्रीसिद्धसेनसूरिप्रणीतैकविंशतिस्थानप्रकरणस्य श्रेयःश्रयङ्कबोधदीपिकानामटीका समाप्तिमफाणीत।

## प्रशस्तिः ।

प्रस्फूर्जत्तपगच्छतारकप्रथप्रोल्लासनाऽहर्मणि-
स्तेजस्विप्रवरोऽजनिष्ट विजयानन्दाभिधः सूरिराट् ।
गोभिर्ढूंढकघूकसन्ततिररं यस्याऽतिखिन्ना हृदि
नोर्ध्वीकर्त्तुमलं क्षितौ स्ववदनं वादस्य तत् का कथा ? ॥१॥
तच्छिष्यः शान्तमूर्त्तिः श्रमणगणनुतः सद्गुणग्रामधामा
जज्ञे विद्वद्वरः श्रीमदमरविजयो दाक्षिणात्योपकारी ।
कृत्वा मूर्त्तिद्विषां यो हृदयनयनयोरञ्जनं सप्रमाणं
दूरीचक्रे दयालुर्घनवृजिनभवामन्धतां ज्ञानवैद्यः ॥ २ ॥
तत्पादाम्भोरुहमधुकरः स्वल्पधीरेकविंश-
स्थानेष्वेनां चतुरविजयो बोधिलाभाय वृत्तिम् ।
चक्रे वर्षे नवहयनिधीन्दुप्रमे (१९७९) वैक्रमीये
विद्वल्लोकैर्जयतु सुचिरं शासने वाच्यमाना ॥ ३ ॥
यदर्जितं पुण्यमिमां विधाय टीकां मया तेन तनोतु वास ।
भवे भवेऽन्तःकरणे मदीये श्रेयःश्रियां धाम जिनेन्द्रभक्तिः ॥
श्रीएकविंशतिस्थानटीकेयं बोधदीपिका ।
संशोध्या कृपया सद्भिर्भव्यानां बोधिदीपिका ॥ ४ ॥

समाप्ता

| | जिननाम. | ऋषभ १ | अजित २ | संभव ३ | अभिनंदन ४ | सुमति ५ | पद्मप्रभ ६ |
|---|---|---|---|---|---|---|---|
| १ | च्यवनविमान | सर्वार्थसिद्ध | विजयवि. | उपरि. ग्रैवे. नीचले वि. | जयंतवि. | जयंतवि. | उपरि. ग्रैवे. |
| २ | जन्मनगरी | विनीता | अयोध्या | श्रावस्ती | विनीता | कौशलपुर | कौशांबी |
| ३ | पितानाम | नाभिकुलकर | जितशत्रु | जितारि | संवरराजा | मेघ राजा | धर राजा |
| ४ | मातानाम | मरुदेवा | विजया | सेना | सिद्धार्था | मंगला | सुसीमा |
| ५ | जन्मनक्षत्र | उत्तराषाढा | रोहिणी | मृगशिरः | पुनर्वसू | मघा | चित्रा |
| ६ | जन्मराशी | धनुः | वृष | मिथुन | मिथुन | सिंह | कन्या |
| ७ | लञ्छन | वृषभ | गज | अश्व | कपि | क्रौंच | कमल |
| ८ | देहमान | ५०० धनुः | ४५० धनुः | ४०० धनुः | ३५० धनुः | ३०० धनुः | २५० धनुः |
| ९ | सर्वायुः | ८४ लाख पूर्व | ७२ ला. पू. | ६० ला. पू. | ५० ला. पू. | ४० ला. पू. | ३० ला. पू. |
| १० | देहवर्ण | पीतवर्ण | पीत | पीत | पीत | पीत | रक्त |
| ११ | अंतर | ० | ५० ला. को. सागरोपम | ३० ला. को. सागरोपम | १० ला. को. सागरोपम | ९ ला. को. सागरोपम | ९० हजा. को. सागरोपम |
| १२ | दिक्षा | राज्य करी | राज्य करी | राज्य करी | राज्य करी | राज्य करी | राज्य करी |
| | ,, | विवाह करी | विवाह करी | विवाह करी | विवाह करी | विवाह करी | विवाह करी |
| | ,, | ४ ह. साथे | हजार साथे | हजार साथे | हजार साथे | हजार साथे | हजार साथे |
| | ,, | विनीतामां | जन्मनगरे | जन्मनगरे | जन्मनगरे | जन्मनगरे | जन्मनगरे |

| | जिननाम | ऋषभ १ | अजित २ | संभव ३ | अभिनंदन ४ | सुमतिनाथ ५ | पद्मप्रभ ६ |
|---|---|---|---|---|---|---|---|
| १३ | दीक्षातप: | छठ-तप करी | षष्ठ तप: | षष्ठ तप करी | छठ तप करी | नित्यभक्त | छठ तप करी |
| १४ | पारणा<br>,,<br>,, | श्रेयांसना हाथे<br>ईक्षुरसथी<br>वर्षना अंते | ब्रह्मदत्तना हाथे<br>परमान्नथी<br>बीजे दिने | सुरेंद्रदत्तना हाथे<br>परमान्नथी<br>बीजे दिवसे | इंद्रदत्तना हाथे<br>परमान्नथी<br>बीजे दिवसे | पद्मना हाथे<br>परमान्नथी<br>बीजे दिवसे | सोमदेवथी<br>परमान्नथी<br>बीजे दिवसे |
| १५ | ज्ञानस्थान<br>ज्ञानतप<br>चत्यवृक्ष | पुरिमताले<br>अट्ठम तपथी<br>न्यग्रोधवृक्ष | प्रव्रज्यास्थाने<br>छठ भक्त<br>सप्तवर्ण | प्रव्रज्यास्थाने<br>छठ भत्त<br>शाल | दीक्षास्थाने<br>छठ भत्त<br>प्रियंगु | दीक्षास्थाने<br>छठ भत्त<br>प्रियंगु | दीक्षास्थाने<br>छठ भत्त<br>छत्राभ |
| १६ | गणधरमानं | ८४ | ९५ | १०२ | ११६ | १०० | १०७ |
| १७ | साधुसंख्या | ८४ हजार | १ लाख | बे लाख | त्रण लाख | ३ ला. २० ह. | ३ ला. ३० ह. |
| १८ | आर्यासंख्या | ३ लाख | ३ ला. ३० ह. | ३ ला. ३६ ह. | ६ ला. ३० ह. | ५ ला. ३० ह. | ४ ला. २० ह. |
| १९ | यक्षनाम | गोमुख | महायक्ष | त्रिमुख | ईश्वर | तंबुरु | कुसुम |
| २० | यक्षणीनाम | चक्रेश्वरी | अजिता | दुरितारिका | काली | महाकाली | श्यामा |
| २१ | सिद्धिस्थान<br>सिद्धितप<br>सिद्धिपरिवार | अष्टापद पर्वत<br>१४ भक्त तप<br>१० ह. साथे | सम्मेत शिखर<br>मासिक तप<br>सहस्र साथे | सम्मेत शिखर<br>मासिक तप<br>सहस्र साथे | सम्मेत शैल<br>मासिक तप<br>सहस्र साथे | सम्मेत शिखर<br>मासिक तप<br>सहस्र साथे | सम्मेत शैले<br>मासिक तप<br>८०३ साथे |

| | जिननाम | सुपार्श्व ७ | चंद्रप्रभ ८ | सुविधि ९ | शीतल १० | श्रेयांस ११ | वासुपूज्य १२ |
|---|---|---|---|---|---|---|---|
| १ | च्यवनविमान | मध्यग्रै. त्रिकनुं उपरलुं. | वैजयंत | आनतवि. | प्राणतदे. | अच्युतवि. | प्राणतवि. |
| २ | जन्मनगरी | वाराणसी | चंद्रपुरी | काकंदी | भद्दिलपुर | सिंहपुर | चंपापुरी |
| ३ | पितानाम | प्रतिष्ठ | महासेन | सुग्रीव | दृढरथ | विष्णु | वसुपूज्य |
| ४ | मातानाम | पृथिवी | लक्ष्मणा | रामा | नंदा | विष्णुदेवी | जया देवी |
| ५ | जन्मनक्षत्र | विशाखा | अनुराधा | मूल | पूर्वाषाढा | श्रवण | शतभिषा |
| ६ | जन्मराशि | तुला | वृश्चिक | धनुः | धनुः | मकर | कुंभ |
| ७ | लञ्छन | स्वस्तिक | चंद्र | मकर | श्रीवत्स | खड्गि | महिष |
| ८ | देहमान | २०० धनुः | १५० धनुः | १०० धनुः | ९० धनुः | ८० धनुः | ७० धनुः |
| ९ | सर्वायुः | २० ला. पू. | १० ला. पू. | २ ला. पू. | १ ला. पू. | ८४ लाख वर्ष | ७२ ला. वर्ष |
| १० | देहवर्ण | स्वर्णवर्ण | श्वेत | श्वेत | पीत | पीत | रक्त |
| ११ | जिनांतर | ९ हजार को. सागरोपम | ९०० कोटी सागरोपम | ९० कोटी सागरोपम | ९ कोटी सागरोपम | ६६ला. २६ह. १०० वर्ष हीन सा. को. कोटी | ५४ सागर |
| १२ | दीक्षा<br>,,<br>,,<br>,, | राज्य करी<br>विवाह करी<br>हजार साथे<br>जन्मनगरे | राज्य करी<br>विवाह करी<br>हजार साथे<br>जन्मनगरे | राज्य करी<br>विवाह करी<br>हजार साथे<br>जन्मनगरे | राज्य करी<br>विवाह करी<br>हजार साथे<br>जन्मनगरे | राज्य करी<br>विवाह करी<br>हजार साथे<br>जन्मनगरे | कुमारा<br>विवाह करी<br>६०० साथे<br>जन्मनगरे |

| | जिननाम | सुपार्श्वनाथ ७ | चंद्रप्रभ ८ | सुविधिनाथ ९ | शीतलनाथ १० | श्रेयांसनाथ ११ | वासुपूज्य १२ |
|---|---|---|---|---|---|---|---|
| १३ | दीक्षातपः | छठ तप करी | छठ तप करी | छठ तप करी | छठ तप करी | छठ तप करी | चउत्थ भत्त |
| १४ | पारणा<br>,,<br>,, | महेंद्रना हाथे<br>परमान्नथी<br>बीजे दिवसे | सोमदत्तना हाथे<br>परमान्नथी<br>बीजे दिवसे | पुष्पना हाथे<br>परमान्नथी<br>बीजे दिवसे | पुनर्वसूथी<br>परमान्नथी<br>बीजे दिवसे | नंदना हाथे<br>परमान्नथी<br>बीजे दिवसे | सुनंदना हाथे<br>परमान्नथी<br>बीजे दिवसे |
| १५ | ज्ञानस्थान<br>ज्ञानतपः<br>चैत्यवृक्ष | दीक्षास्थाने<br>छठ भत्त<br>शिरीष | दीक्षास्थाने<br>छठ भत्त<br>नाग | दिक्षास्थाने<br>छठ भत्त<br>मल्लिका | दीक्षास्थाने<br>छठ भत्त<br>प्रियंगु | दीक्षास्थाने<br>छठ भत्त<br>तिंदुक | दीक्षास्थाने<br>चउत्थ भत्त<br>पाडल |
| १६ | गणधरमान | ९५ | ९३ | ८८ | ८१ | ७२ | ६६ |
| १७ | साधुसंख्या | ३ लाख | अढी लाख | बे लाख | एक लाख | ८४ हजार | ७२ हजार |
| १८ | आर्यासंख्या | ४ला. ३०ह. | ३ला. ८०ह. | १ला. २०ह | १ला. उपर ६ | १ ला. ३ ह. | १ लाख. |
| १९ | यक्षनाम | मातंग | विजय | अजित | ब्रह्मा | मनुज | सुरकुमार |
| २० | यक्षिणीनाम | शांता | ज्वाला | सुतारा | अशोका | श्रीवत्सा | प्रवरा |
| २१ | सिद्धिस्थान<br>सिद्धितप<br>सिद्धिपरिवार | सम्मेत शैले<br>मासक<br>५ सो साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | चंपापुरी<br>मासिक<br>६ सो साथे |

| | जिननाम. | विमल १३ | अनंत १४ | धर्मनाथ १५ | शांतिनाथ १६ | कुंथुनाथ १७ | अरनाथ १८ |
|---|---|---|---|---|---|---|---|
| १ | च्यवनविमान | सहस्रारवि. | प्राणतवि. | विजयवि. | स र्थिसिद्धि | सर्वार्थसिद्धि | सर्वाथसिद्धि |
| २ | जन्मनगरी | कांपिल्यपुर | अयोध्या | रत्नपुर | हस्तिनागपुर | गजपुर | गजपुर |
| ३ | पितानाम | कृतवर्म्मा | सिंहराजा | भानु | विश्वसेन | शूर | सुदर्शन |
| ४ | मातानाम | श्यामा | सुयशाः | सुव्रता | अचिरा | श्री | देवी |
| ५ | जन्मनक्षत्र | उत्तराभाद्रपद | रेवती | पुष्य | भरणी | कृत्तिका | रेवती |
| ६ | जन्मराशी | मीन | मीन | कर्क | मेष | वृष | मीन |
| ७ | लञ्छन | शूकर | श्येन | वज्र | हरिण | छाग | नंदावर्त्त |
| ८ | देहमान | ६० धनुः | ५० धनुः | ४५ धनुः | ४० धनुः | ३५ धनुः | ३० धनुः |
| ९ | सर्वायुः | ६० ला. वर्ष | ३० ला. वर्ष | १० ला. वर्ष | १ ला. वर्ष | ९५ ह० वर्ष | ८४ ह० वर्ष |
| १० | देहवर्ण | पीत | पीत | पीत | पीत | पीत | पीत |
| ११ | जिनांतर | ३० सागर | ९ सागरोपम | ४ सागरोपम | त्रिभागहीन ३ सागरोपम | पल्योपमार्द्ध | १ हजार कोटी वर्षन्यून पल्योपम चतुर्भाग |
| १२ | दिक्षा | राज्य करी | राज्य करी | राज्य करी | राज्य करी | राज्य करी | राज्य करी |
| | ,, | विवाह करी | विवाह करी | विवाह करी | विवाह करी | विवाह करी | विवाह करी |
| | ,, | हजार साथे | हजार साथे | हजार साथे | हजार साथे | हजार साथे | हजार साथे |
| | ,, | जन्मनगरे | जन्मनगरे | जन्मनगरे | जन्मनगरे | जन्मनगरे | अन्मनगरे |

| | जिननाम | विमल १३ | अनंतनाथ १४ | धर्मनाथ १५ | शांतिनाथ १६ | कुंथुनाथ १७ | अरनाथ १८ |
|---|---|---|---|---|---|---|---|
| १३ | दीक्षातपः | छठ तप करी | छठ तप करी | छठ तप करी | छठ तप करी | छठ तप करी | छठ तप करी |
| १४ | पारणा<br>,,<br>,, | जयना हाथे<br>परमान्नथी<br>बीजे दिवसे | विजयना हाथे<br>परमान्नथी<br>बीजे दिवसे | धमसिंहना हाथे<br>परमान्नथी<br>बीजे दिवसे | सुमित्रना हाथे<br>परमान्नथी<br>बीजे दिवसे | व्याघ्रसिंहना<br>हाथे परमान्नथी<br>बीजे दिवसे | अपराजित हाथे<br>परमान्नथी<br>बीजे दिवसे |
| १५ | ज्ञानस्थान<br>ज्ञानतपः<br>चैत्यवृक्ष | दीक्षास्थाने<br>छठ भत्त<br>जंबू | दीक्षास्थाने<br>छठ भत्त<br>अश्वत्थः | दिक्षास्थाने<br>छठ भत्त<br>दधिपर्ण | दीक्षास्थाने<br>छठ भत्त<br>नंदीवृक्षः | दीक्षास्थाने<br>छठ भत्त<br>तिलक | दीक्षास्थाने<br>छठ भत्त<br>चंपक |
| १६ | गणधर | ५७ | ५० | ४३ | ३६ | ३५ | ३३ |
| १७ | साधुसंख्या | ६८ हजार | ६६ हजार | ६४ हजार | ६२ हजार | ६० हजार | ५० हजार |
| १८ | आर्यासंख्या | १ला. ८०० | ६२ हजार | ६२ ह. ४०० | ६१ ह. ६०० | ६० ह. ६०० | ६० हजार |
| १९ | यक्षनाम | षण्मुख | पाताल | किन्नर | गरुड | गंधर्व | यक्षेंद्रनामा |
| २० | देवीनाम | विजया | अंकुशी | प्रज्ञप्ति | निर्वाणी | अच्युता | धरणी |
| २१ | सिद्धिस्थान<br>सिद्धितपः<br>सिद्धिपरिवार | सम्मेत शैले<br>मा सक<br>६ ह. साथे | सम्मेत शैले<br>मासिक<br>७ हजार साथे | सम्मेत शैले<br>मासिक<br>८०० साथे | सम्मेत शैले<br>मासिक<br>९०० साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | सम्मेतशैले<br>मासिक<br>हजार साथे |

| | जिननाम | मल्लिनाथ १९ | मुनिसुव्रत २० | नमिनाथ २१ | नेमनाथ २२ | पार्श्वनाथ २३ | श्रीवर्धमान २४ |
|---|---|---|---|---|---|---|---|
| १ | च्यवनविमान | जयंतवि. | अपराजित | प्राणतकल्प | अपराजित | प्राणत | प्राणत |
| २ | जन्मनगरी | मिथिला | राजगृह | मिथिला | सौर्यपुर | वाराणसी | क्षत्रियकुंड ग्राम |
| ३ | पितानाम | कुंभ | सुमित्र | विजय | समुद्रविजय | अश्वसेन | सिद्धार्थनृप |
| ४ | मातानाम | प्रभावती | पद्मा | वप्रा | शिवा | वामा | त्रिशला |
| ५ | जन्मनक्षत्र | अश्विनी | श्रवण | अश्विनी | चित्रा | विशाखा | उत्तराफाल्गुनी |
| ६ | जन्मराशि | मेष | मकर | मेष | कन्या | तुला | कन्या |
| ७ | लञ्छन | कलश | कच्छप | नीलोत्पल | शंख | सर्प | सिंह |
| ८ | देहमान | २५ धनुः | २० धनुः | १५ धनुः | १० धनुः | ९ हाथ | ७ हाथ |
| ९ | सर्वायुः | ५५ ह० वर्ष | ३० ह० वर्ष | १० ह० वर्ष | १ ह० वर्ष | १०० वर्ष | ७२ वर्ष |
| १० | देहवर्ण | नीलवर्ण | श्याम | पीत | श्याम | नील | स्वर्णवर्ण |
| ११ | जिनांतर | १ हजार को. वर्ष | ५४ लाख वर्ष | ६ ला. वर्ष | ५ लाख वर्ष | ८३ हजार ७५० वर्ष अधिक | २५० वर्ष |
| १२ | दीक्षा<br>,,<br>,,<br>,, | कुमार, अपरिणीत ३०० स्त्री अने ३०० पुरुष जन्मनगरे | राज्य करी विवाह करी सहस्रसंगे जन्मनगरे | राज्य करी विवाह करी हजार साथे जन्मलगरे | कुमार अविवाहित सहस्र साथे द्वारिकामां | कुमार विवाह करी ३०० साथे जन्मनगरे | कुमारा विवाह करी एकाकी जन्मनगरे |

| | जिननाम | मल्लिनाथ १९ | मुनिसुव्रत २० | नमिनाथ २१ | नेमिनाथ २२ | पार्श्वनाथ २३ | महावीर २४ |
|---|---|---|---|---|---|---|---|
| १३ | दीक्षातपः | अष्टम तपः | षष्ठ तपः | षष्ठ तप करी | छठ तप करी | अट्ठम तप | छठ तप करी |
| १४ | पारणा<br>,,<br>,, | विश्वसेनना हाथे<br>परमान्नथी<br>बीजे दिवसे | ब्रह्मदत्तना हाथे<br>परमान्नथी<br>बीजे दिने | दिन्नना हाथे<br>परमान्नथी<br>बीजे दिवसे | वरदिन्नना हाथे<br>परमान्नथी<br>बीजे दिवसे | धन्यना हाथे<br>परमान्नथी<br>बीजे दिवसे | बहुलविप्रनाहाथे<br>परमान्नथी<br>बीजे दिवसे |
| १५ | ज्ञानस्थान<br>ज्ञानतपः<br>चैत्यवृक्ष | दीक्षास्थाने<br>अष्टमांते<br>अशोक | दीक्षास्थाने<br>षष्ठतपोंते<br>चंपक | दीक्षास्थाने<br>छठ भत्त<br>बकुल | दीक्षास्थाने<br>अष्टमांते<br>वेतस | दीक्षास्थाने<br>अष्टमाऽन्ते<br>धववृक्ष | ऋजुवा० नदी<br>छठ भत्त<br>शालवृक्ष |
| १६ | गणधरमानं | २८ | १८ | १७ | १८ | १० | ११ |
| १७ | साधुसंख्या | ४० हजार | ३० हजार | २० हजार | १८ हजार | १६ हजार | १४ हजार |
| १८ | आर्यासंख्या | ५५ हजार | ५० हजार | ४१ हजार | ४० हजार | ३८ हजार | ३६ हजार |
| १९ | यक्षनाम | कूबर | वरुण | भृकुटिनामा | गोमेध | वामन | मातंग |
| २० | यक्षणीनाम | वैरोट्या | दत्ता | गांधारी | अंबा | पद्मावती | सिद्धायिका |
| २१ | सिद्धिस्थान<br>सिद्धितपः<br>सिद्धिपरिवार | सम्मेत शैले<br>मासिक<br>५०० साथे | सम्मेत शैले<br>मासिक<br>ह साथे | सम्मेत शैले<br>मासिक<br>हजार साथे | गिरनार<br>मासिक<br>५३६ साथे | सम्मेत शिखर<br>मासिक<br>३३ मुनि साथे | पावापुरी<br>छठ तपथी<br>एकाकी |

॥ श्रीः ॥

श्रीमद्विजयानन्दसूरिपुरन्दरचरणेन्दिन्दिवराभ्यां नमो नमः ।

**श्रीमदमरविजयमुनिवर्यशिष्याणुचतुरविजयमुनिप्रणीतानि**

# पञ्चदशतिथीचैत्यवन्दनानि ।

## अथ प्रतिपच्चैत्यवन्दनम् ॥ १ ॥

श्रेयः श्रियां पात्रमपास्तकर्मा श्रीकुन्थुनाथो जिन आप मोक्षम् ।
यस्यां तिथौ माधवमासि कृष्णे सुखानि सा नः प्रतिपत्तनोतु ॥१॥

यस्यां दशक्षेत्रजिनेश्वराणां कल्याणकत्रिंशदरं बभूवुः ।
जिनेन्द्रपादाम्बुजभक्तिभाजां सुखानि सा नः प्रतिपत्तनोतु ॥२॥

यस्यां स्नेहनिबन्धने विगलिते श्रीवीरतीर्थेशितु-
ज्ञानं केवलमिन्द्रभतिगणभृत् प्रातः समासेदिवान् ।
एकत्त्वं हृदि भावयन्नसुमतां शुक्ले दले कार्त्तिके
श्रेयःश्रीनिवहाय नः प्रतिपदस्त्वेषा सदा सत्तिथिः ॥३॥

## अथ द्वितीयाचैत्यवन्दनम् ॥ २ ॥

श्रेयःश्रियां वसतिवेश्म जिनोपदिष्टा
दुष्कर्ममर्मभिदुरा भविदेहभाजाम् ।
याऽऽनन्दमङ्गलकरी वृजिनौघहन्त्री
सा नस्तिथिः शिवसुखं ददतां द्वितीया ॥१॥

जन्माऽभिनन्दनजिनः समवाप माघ–
शुक्लेऽथ केवलमवाप च वासुपूज्यः ।
यस्यां तपस्यधवले च्यवनं तथाऽरः
सा नस्तिथिः शिवसुखं ददतां द्वितीया ॥२॥

यस्यां च माधवशितौ विगताष्टकर्मा
श्रीशीतलो जिनपतिः समवाप मोक्षम् ।
लेभे नभःसितदले सुमतिश्च्युतिं च
सा नस्तिथिः शिवसुखं ददतां द्वितीया ॥३॥

इत्याद्यनेकजिनराट्च्यवनादिकानि
कल्याणकानि दुरितौघविनाशकानि ।
यस्यां बभूवुरनिशं जिनभक्तिभाजां
सा नस्तिथिः शिवसुखं ददतां द्वितीया ॥४॥

या धर्मद्वितयं समुन्नयति च प्राणस्पृशां बन्धन–
द्वन्द्वं ध्वंसयते च दुर्गतियुगद्वारार्गलासन्निभा ।
दुर्ध्यानद्वितयं भिनत्ति विमलध्यानद्वयं पुष्यति
श्रेयःश्रीनिचयं दिशत्वनुदिनं सा नो द्वितीया तिथिः ॥९॥

## अथ तृतीयाचैत्यवन्दनम् ॥ ३ ॥

चैत्रार्जुने दुस्तपसेतघातिर्ज्ञानं ययौ कुन्थुजिनोऽथ यस्याम् ।
श्रेयांसमुक्तिर्नभसोऽसिते च सा नस्तृतीया तनुतात्तिथिः शम् ॥१॥
माघार्जुने श्रीविमलस्य जन्म श्रीधर्मनाथस्य च यत्र जज्ञे ।
ऊर्जार्जुने श्रीसुविधिर्जिनोऽभूत् सा नस्तृतीया तनुतात्तिथिः शम् ॥२॥

दुर्लेश्यात्रितयं भिनत्ति विमलं लेश्यात्रयं पुष्यति
दुःशल्यत्रितयं विनाशयति या पुष्णाति गुप्तित्रयम् ।
त्रैलोक्याग्रपदप्रदानचतुरा भव्याङ्गभाजां शुभा
श्रेयःश्रीततिमातनोतु नितरां सा नस्तृतीया तिथिः ॥३॥

## अथ चतुर्थीचैत्यवन्दनम् ॥ ४ ॥

श्रेयःश्रियां धाम जगाम यत्र ज्ञानं च्युतिं मध्वसिते च पार्श्वः ।
तपस्यशुक्ले च्यवनं च मल्लिः सा नश्चतुर्थी शिवतातयेऽस्तु ॥१॥

माघार्जुने श्रीविमलस्य दीक्षाऽभिनन्दनो राधसिते च्युतश्च ।
च्युतः शुचौ कृष्णदले वृषाङ्कः सा नश्चतुर्थी शिवतातयेऽस्तु ॥२॥

दूरीकृत्य चतुष्कषायनिचयं संज्ञाचतुष्कागडं
छित्वा घातिचतुष्टयीं च विमला या नाशयित्वाऽङ्गिनाम् ।
दत्ते देवचतुर्निकायमहितां मुक्तिं च भद्रङ्करां
श्रेयःश्रीततिमातनोतु नितरां सा नश्चतुर्थी तिथिः ॥३॥

## ॥ अथ पञ्चमीचैत्यवन्दनम् ॥ ५ ॥

श्रेयःश्रियां दानविधानदक्षा कल्याणकैस्तीर्थकृतां वलक्षा ।
या पापहर्त्री भविनां सुकृत्यैः सा पञ्चमी नस्तिथिरस्तु भूत्यै ॥१॥

चैत्रार्जुनेऽभूदजितस्य यस्यां श्रीसम्भवाऽनन्तजितोश्च मोक्षः ।
चन्द्रप्रभो माधवसिते च्युतश्च सा पञ्चमी नस्तिथिरस्तु भूत्यै ॥२॥

यत्राऽभवन्माधवकृष्णपक्षे श्रीकुन्थुनाथस्य जिनस्य दीक्षा ।
ज्येष्ठार्जुने धर्मजिनस्य मुक्तिः सा पञ्चमी नस्तिथिरस्तु भूत्यै ॥३॥

नभःसिते यत्र च नेमिजन्मोर्जे सम्भवः श्यामदले जिनोऽभूत् ।
जन्माऽऽप मार्गे सुविधिश्च कृष्णे सा पञ्चमी नस्तिथिरस्तु भूत्यै॥४॥

पञ्चेषुद्विपपञ्चवक्त्रसदृशा या प्राणिनां पञ्चम–
ज्ञानोल्लासकरी वशं नयति या पञ्चेन्द्रियार्थव्रजम् ।
या पञ्चाऽऽश्रवरोधनातिचतुरा पञ्चप्रमादापहा
श्रेयःश्रीततिमातनोतु नितरां सा पञ्चमी नस्तिथिः ॥९॥

## अथ षष्ठीचैत्यवन्दनम् ॥ ६ ॥

श्रीशीतलो राधशितौ च्युतोऽर्हन् श्रेयांसनाथोऽप्यथ शुक्रकृष्णे ।
वीरच्युतिर्यत्र शुचौ वलक्षे श्रेयःश्रिये नस्तिथिरस्तु षष्ठी ॥ १ ॥
नभःसिते नेमिजिनस्य दीक्षा मार्गासितेऽभूत् सुविधेश्च यस्याम् ।
पद्मप्रभो माघशितौ च्युतश्च श्रेयःश्रिये नस्तिथिरस्तु षष्ठी ॥२॥
ज्ञानी सुपार्श्वोऽथ तपस्यकृष्णे पौषार्जुनेऽभूद्विमलोऽपि तद्वत् ।
यस्यां परिज्ञातसमस्तभावः श्रेयःश्रिये नस्तिथिरस्तु षष्ठी ॥ ३ ॥

## अथ सप्तमीचैत्यवन्दनम् ॥ ७ ॥

श्रेयःश्रियां सद्मनि यत्र जज्ञे धर्मच्युतिर्माधवशुक्लपक्षे ।
आषाढकृष्णे विमलः शिवेऽगात् सा सप्तमी नोऽस्तु तिथिः समृद्ध्यै ॥१
चन्द्रप्रभो मोक्षमगान्नभस्यकृष्णे च्युतः शान्तिजिनोऽपि यस्याम् ।
नभोऽसितेऽनन्तजिनच्युतिश्च सा सप्तमी नोऽस्तु तिथिः समृद्ध्यै ॥२॥

चन्द्रप्रभो ज्ञानमवाप यत्र मोक्षं सुपार्श्वश्च तपस्यकृष्णे ।
श्रेयःश्रियं प्राप नतामरेन्द्रः सा सप्तमी नोऽस्तु तिथिः समृद्ध्यै ॥३॥

## अथाऽष्टमीचैत्यवन्दनम् ॥ ८ ॥

श्रेयःश्रियां धाम तपस्यशुक्ले श्रीसम्भवस्य च्यवनं तु यस्याम् ।
नेमिः शिवोऽगाच्छुचिशुक्लपक्षे सैषाऽष्टमी स्ताच्छिवशर्मदा नः ॥१॥

चैत्रासिते नाभिनरेन्द्रसूनोर्यस्यां जनिः शर्मकरी च दीक्षा ।
जन्माऽजितो माघसिते प्रपन्नः सैषाऽष्टमी स्ताच्छिवशर्मणे नः ॥२॥

भेजे शिवं माधवशुक्लपक्षेऽभिनन्दनः श्रीसुमतिर्जनिं च ।
ज्येष्ठासिते सुव्रतजन्म यत्र सैषाऽष्टमी स्ताच्छिवशर्मदा नः ॥३॥

नभोऽसिते श्रीनमिनाथजन्म नभःसिते यत्र च पार्श्वमुक्तिः ।
च्युतः सुपार्श्वश्च नभस्यकृष्णे सैषाऽष्टमी स्ताच्छिवशर्मदा नः ॥४॥

इत्थं तीर्थकृतामबाध्यवचसां छिन्नाष्टदुष्कर्मणां
पूता ज्ञानवतां सुरार्चनभृतां जन्मादिकल्याणकैः ।
उद्यद्भक्तिजुषां विशुद्धतपसां सत्तीर्थयात्रादिषु
श्रेयःश्रीततिमातनोतु नितरां सैषाऽष्टमी नस्तिथिः ॥५॥

## अथ नवमीचैत्यवन्दनम् ॥ ९ ॥

श्रेयःश्रियां धाम मधोर्वलक्षे मोक्षं प्रपन्नः सुमतिर्जिनेन्द्रः ।
यस्यां स वैशाखसिते च दीक्षां सा नस्तिथिः स्तान्नवमी सुखाय ॥१॥
ज्येष्ठेऽसिते मोक्षमतीतदोषः शिश्राय यस्यां मुनिसुव्रतोऽर्हन् ।
श्रीवासुपूज्यश्च्यवनं च शुभ्रे सा नस्तिथिः स्तान्नवमी सुखाय ॥२॥
आषाढकृष्णे नमिनाथदीक्षा नभोऽसिते कुन्थुजिनच्युतिश्च ।
नभस्यशुक्ले सुविधिः शिवेऽगात् सा नस्तिथिः स्तान्नवमी सुखाय ॥३॥
पौषार्जुने ज्ञानमवाप शान्तिर्दिक्षां जिनो माघसितेऽजितश्च ।
तपस्यकृष्णे सुविधिश्च्युतोऽर्हन् सा नस्तिथिः स्तान्नवमी सुखाय ॥४॥

इत्थं सद्गुणभाजनं जिनवरा यस्यां स्वजन्मच्युति-
दीक्षाज्ञानशिवश्रियं त्रिभुवनानन्दप्रदां लेभिरे ।
नृणां यत्तपसा नवाऽपि निचयः पादे लुठन्त्यञ्जसा
श्रेयःश्रीततिमातनोतु नवमी सा नस्तिथिः सर्वदा ॥५॥

## अथ दशमीचैत्यवन्दनम् ॥ १० ॥

श्रीवीरदीक्षा मृगशीर्षकृष्णे मार्गाऽर्जुनेऽरस्य जनिः शिवं च ।
पौषाऽसिते पार्श्वजनिश्च यस्यां सा श्रेयसे स्ताद्दशमी तिथिर्नः ॥१॥

श्रीवर्द्धमानश्चरमो जिनेन्द्रोऽभूत् केवली माधवशुक्लपक्षे ।
वैशाखकृष्णे नमिराप मोक्षं सा श्रेयसे स्ताद्दशमी तिथिर्नः ॥२॥
दशप्रकारं मुनिराजधर्मं पुष्णाति याऽसंवरभेददक्षा ।
मिथ्यात्त्वभेदांश्च दशाऽपि हन्ति सा श्रेयसे स्ताद्दशमी तिथिर्नः ॥३॥

## अथैकादशीचैत्यवन्दनम् ॥ ११ ॥

श्रेयःश्रियां मन्दिरमिन्दिरालीलीलालयं कर्ममहीध्रवज्रम् ।
प्रोक्ता हितायाऽङ्गभृतां जिनैर्या सैकादशी नो वितनोतु भद्रम् ॥१॥
यस्यां मधुश्वेतदले विघातिर्ज्ञानं प्रपेदे सुमतिर्जिनेन्द्रः ।
पद्मप्रभो मोक्षमशुभ्रमार्गे सैकादशी नो वितनोतु भद्रम् ॥२॥
श्रीमल्लिनाथो मृगशीर्षशुक्ले जनिं च दीक्षामरमल्लिनाथौ ।
ज्ञानं श्रितौ मल्लिनमी च यस्यां सैकादशी नो वितनोतु भन्द्रम् ॥३॥
पौषासिते पार्श्वजिनस्य दीक्षा पौषार्जुने ज्ञानमितोऽजितश्च ।
तपस्यकृष्णे ऋषभो जिनोऽभूत् सैकादशी नो वितनोतु मन्द्रम् ॥४॥

कृत्वैकादश वत्सरान् भवभृतो यस्यास्तपो निर्मलं
न्यायोपार्जितया श्रिया विदधते पूर्णे तदुद्यापनम् ।
भक्त्यैकादश लेखयन्ति चतुरैरेकादशाङ्गप्रतीः
श्रेयःश्रीततिमातनोतु नितरां सैकादशी नस्तिथिः ॥५॥

## अथ द्वादशीचैत्यवन्दनम् ॥१२॥

श्रेयःश्रियां भर्तुरभीष्टदातुः शुक्रे सुपार्श्वस्य जनिर्वलक्षे ।
राधार्जुने श्रीविमलच्युतिश्च सा द्वादशी नोऽस्तु तिथिः शिवाय ॥१॥
नेमिच्युतिः कार्त्तिककृष्णपक्षे पद्मप्रभस्यापि जनिश्च यस्याम् ।
ऊर्जार्जुने ज्ञानमरः प्रपन्नः सा द्वादशी नोऽस्तु तिथिः शिवाय ॥२॥
माघासिते शीतलजन्मदीक्षेऽभिनन्दनो माघसितेऽनगारः ।
चन्द्रप्रभः पौषशितौ प्रसूतः सा द्वादशी नोऽस्तु तिथिः शिवाय ॥३॥
मल्लिः शिवं सुव्रत आप दीक्षां सिते तपस्येऽप्यसिते जिनोऽभूत् ।
श्रेयांसजन्माऽपि तपस्यकृष्णे सा द्वादशी नोऽस्तु तिथिः शिवाय ॥४॥

नम्रद्वादशकल्पवासवनता जन्मादिभाजो जिना
यस्यां द्वादश सद्व्रतानि गृहिणां नाशाय दुष्कर्मणाम् ।
भिक्षूणां प्रतिमास्तथा वरतपोभेदाङ्गगुर्द्वादश
श्रेयःश्रीततिमातनोतु नितरां सा द्वादशी नस्तिथिः ॥५॥

## अथ त्रयोदशीचैत्यवन्दनम् ॥ १३ ॥

चैत्रार्जुनेऽपश्चिमतीर्थभर्त्तुर्वीरस्य यस्यां जननं बभूव ।
श्रेयांसदीक्षा च तपस्यकृष्णे त्रयोदशी साऽस्तु तिथिः श्रिये नः ॥१॥

वैशाखकृष्णे समवाप यस्यामनन्तजित्तीर्थपतिस्तु जन्म ।
वैशाखशुक्लेऽप्यजितश्च्युतोऽर्हन् त्रयोदशी साऽस्तु तिथिः श्रिये नः २

ज्येष्ठासिते जन्म शिवं च शान्तेः सुपार्श्वदीक्षाऽप्यथ शुक्रशुक्ले ।
माघासिते श्रीवृषभाङ्कमोक्षः त्रयोदशी साऽस्तु तिथिः श्रिये नः ॥३॥

पद्मप्रभः कार्त्तिककृष्णपक्षे दीक्षां ललौ त्यक्तगृहिप्रपञ्चः ।
पौषासिते प्रव्रजितश्च चन्द्रस्त्रयोदशी साऽस्तु तिथिः श्रिये नः ॥४॥

माघार्जुने धर्मजिनस्य दीक्षाऽभूद्यत्र कल्याणकरी जनानाम् ।
श्रेयःश्रियामद्भुतमेकमोकस्त्रयोदशी साऽस्तु तिथिः श्रिये नः ॥५॥

## अथ चतुर्दशीचैत्यवन्दनम् ॥ १४ ॥

वैशाखकृष्णे सुखदायि यत्राऽनन्तो व्रतं ज्ञानमपि प्रपेदे ।
श्रेयःश्रियां धाम जनिं च कुन्थुस्तिथिः श्रिये साऽस्तु चतुर्दशी नः १

आषाढशुक्ले विगताष्टकर्मा श्रीवासुपूज्यः शिवमाप यस्याम् ।
ज्येष्ठासिते शान्तिजिनश्च दीक्षां तिथिः श्रिये साऽस्तु चतुर्दशी नः २

श्रीशीतलो ज्ञानमवाप कृष्णे पौषेऽथ शुक्लेऽप्यभिनन्दनश्च ।
मार्गार्जुने सम्भवजन्म यत्र तिथिः श्रिये साऽस्तु चतुर्दशी नः ॥३॥

जगाम यत्राभिनवार्कतेजाः श्रीवासुपूज्यो जननं जिनेन्द्रः ।
तपस्यकृष्णेऽमरवृन्दवन्द्यस्तिथिः श्रिये साऽस्तु चतुर्दशी नः ॥४॥

आत्मानन्दविधायिनी भवभृतां कल्याणसम्पादिनी
दुष्कर्मौघविनाशिनी च निविडध्वान्तावलिध्वंसिनी ।
या मुक्तेरभिलाषिभिश्च चतुरैः सेव्यामरैर्मानवैः
श्रेयःश्रीततिमातनोतु नितरां सा नश्चतुर्दश्यरम् ॥ ९ ॥

## अमावसीचैत्यवन्दनम् ॥

श्रेयःश्रीणां राजिभिर्वर्द्धमानस्तीर्थाधीशः कार्त्तिके वर्द्धमानः ।
मोक्षं लेभे शाश्वतानन्दधाम साऽमावास्या सत्तिथिर्नः श्रिये स्तात् १
ज्ञानी जज्ञे श्रीसमुद्रावनीशवंशक्षीराम्भोधिवृद्धिक्षपेशः ।
नेमिर्यस्यामाश्विने विश्वपूज्यः साऽमावास्या सत्तिथिर्नः श्रिये स्तात् २
माघे मासे घातिकर्मण्यतीते श्रीश्रेयांसः केवली यत्र जज्ञे ।
दीक्षामापद्वासुपूज्यस्तपस्ये साऽमावास्या सत्तिथिर्नः श्रिये स्तात् ३

## अथ पूर्णिमाचैत्यवन्दनम् ।

पद्मप्रभो ज्ञानमवाप चैत्रे श्रीसुव्रतोऽर्हन्नभसि च्युतश्च ।
नमिच्युतिश्चाश्विनमासि यस्यां सा पूर्णिमा नः श्रियमातनोतु ॥१॥
दीक्षां प्रपेदे मृगशीर्षमासे श्रीसम्भवस्तीर्थपतिस्तु यस्याम् ।
केवल्यभूद्धर्मजिनस्तु पौषे सा पूर्णिमा नः श्रियमातनोतु ॥२॥
श्रेयःश्रीणां धाम कल्याणकानि यस्यामित्यादीनि तीर्थङ्कराणाम् ।
वर्षे सव्ये भारते जज्ञिरेऽत्र सा शं पुष्यात् पूर्णिमा सत्तिथिर्नः ३

## अथ प्रशस्तिः ।

प्रस्फूर्जत्तपगच्छतारकपथप्रोल्लासनाऽहर्मणि-
स्तेजस्विप्रवरोऽजनिष्ट **विजयानन्दाभिधः** सूरिराट् ।
गोभिर्ढूण्ढकघूकसन्ततिररं यस्याऽतिखिन्ना हृदि
नोर्ध्वीकर्त्तुमलं क्षितौ स्ववदनं वादस्य तत् का कथा ? ॥१॥
तच्छिष्यः शान्तमूर्त्तिः श्रमणगणनुतः सद्गुणग्रामधामा
जज्ञे विद्वद्वरः **श्रीमदमरविजयो** दाक्षिणात्योपकारी ।
कृत्वा मूर्त्तिद्विषां यो हृदयनयनयोरञ्जनं सप्रमाणं
दूरीचक्रे दयालुर्घनवृजिनभवामन्धतां ज्ञानवैद्यः ॥२॥
तत्पादाम्भोरुहमधुकरव्रातसब्रह्मचारी
स्वल्पप्रज्ञश्चतुरविजयः संयमी ज्ञानभक्त्या ।
एताश्चक्रे नवहयनिधीन्दुप्रमे वैक्रमेऽब्दे
मार्गे शुक्ले शिवमिततिथौ संस्तुतीः सत्तिथीनाम् ॥३॥

